नं० ५-६३-घ-२-ख

किरातार्जुनीयम्

(काव्यम्)

सर्गाः १२ तः १५ पर्य्यन्तम्

पत्राणि ५३-२-ख

१८५

नं० ५६३ - ९ ग्रं०

(भारविकृतम्) किरातार्जुनीयम् (काव्यम्)

पत्राणि ५३

कि॰ का॰ टी॰
पं॰ स॰ १३
१

श्रीगणेशाय नमः वपुषेति अथेश्वरस्यानंतरं महेन्द्रसूनुरर्जुनः परमेण वपुषा हेतुना भूधराणां विभेदे विदारणे संभाव्यं पराक्रमं यस्य सत्वा येन
यमिति प्रतर्क्ययोग्यं स्थिराभ्यां दृढाभ्यां दंष्ट्राभ्यामुग्रं मुखं यस्य तं मृगं वराहमित्यर्थः आशु शीघ्रं गमनानंतरं अविलंबेनेत्यर्थः विलोकयांबभूव ददर्श अ
स्मिन्सर्गे आकु पंचत्रिंशत् श्लोकाः औपच्छंदसिकं वृत्तं वैतालीयानंतरं तद्वैवांतेधिके गुरौ स्यादौपच्छंदसिकं कवींद्रहृद्यमिति लक्षणात् १ स्फुटेति स्फु

वपुषा परमेण भूधराणामथ संभाव्यपराक्रमं विभेदे मृगमाशु विलोकयंचकार स्थिरदंष्ट्रोग्रमुखं महेन्द्रसूनुः १

स्फुटबद्धसटोन्नतिः स दूरादभिधावन्नवधीरितान्यकृत्यः जयमिच्छति तस्य जातशंके मनसीमं मुहुराददे वितर्कं २

टबद्धा स्फुटं विरचिता सटानां केसराणां उन्नतिरुद्गतिर्यस्य स क्रोधात् हृषितरोमेत्यर्थः सटाजटाकेसरयोरित्यमरः दूरादभिधावन्नवधी
रितान्यकृत्यः अनन्यकर्मा स वराहो जयमिच्छति जयार्थिनि अत एव जातशंके स्वयं जिष्णौ सोऽपि धामेकलहत्वादितिभावः तस्य मुनेर्मनसि मुहुरिमं वि
तर्कं वक्ष्यमाणमूहं अध्याहारस्तर्के च इत्यमरः आददे उत्पादितवान् अथैकादशभिर्वितर्कमेव निरूपयति २ राम राम राम

१

नेति ॥ तस्यार्जुनस्य मानसं संसन्निहितानि यानि ॥ पक्क सुरभीणि ॥ पाकसुगंधीनि तेषु फलेषु ॥ तथा शुचिनि स्वच्छे शिशिरे ॥ पयसि च न पपात ॥ न किंचिदाचकांक्षेत्यर्थः ॥ आ
राधारणं तु तस्य तपसेत्याह ॥ तथा हि सुकर्मणां सुकृतिनां शोभनं तपः ॥ सुतपो मृतायते ॥ अमृतवदाचरति ॥ किं तत्फलज्ञानां ॥ तपानां तर्पणैरिति भावः ॥ लोहितादिडाज्भ्यः क्य
ष् ॥ वा क्यषन्नात्मनेपदं ॥ लोहितादिराकृतिगणः ॥ ४ ॥ नेति ॥ सोऽर्जुनेन विस्मये अहो मया महत्तपस्तप्तमिति विस्मयं जगाम ॥ तपः स्मरति विस्मयादिति निषेधादिति भा
वः ॥ न विषसाद ॥ फलविलंबाद्दैन्यात्साहो न बभूव ॥ विषादश्चेतसो भंग इति लक्षणात् ॥ सादिष्टनेतीति यत्त्वं ॥ मुहुस्तन्नसततं तपसि ॥ मंदोद्यमत्वं च न आगमत् ॥ किंच हृतश

नपपात संनिहितपक्क सुरभिषु फलेषु मानसं ॥ तस्य शुचिनि शिशिरे च पयस्य मृतायते हि तपः सुकर्मणां ॥ ४ ॥ न विसिस्
मिये न विषसाद मुहुरलसतां न चाददे ॥ सत्त्वमरुधृतिरजस्तमसी न हतः स्म तस्य हतशक्तिपेलवे ॥ ५ ॥ तपसा कृशं वपुरुवा
ह स विजितजगत्त्रयोदयं ॥ त्रासजननमपि तत्त्वविदां नदस्ति यन्न सुकरं मनस्विभिः ॥ ६ ॥

क्तिनी हृतसारे ॥ अत एव ॥ पेलवे भं
गुरे ॥ हृतशक्तिपेलवे ॥ रजस्तमसी गुणौ ॥ उरुधृतिमहासारं ॥ तस्यार्जुनस्य सत्त्वं ॥ सत्त्वगुणं न हतः स्म ॥ न हतवती ॥ हंतेर्लट् स्म इति ॥ लट् भूतार्थत्वं ॥ ५ ॥ तप
सेति ॥ सोऽर्जुनस्तपसा कृशं ॥ तथापि विजिते ॥ जगत्त्रयोदयं ॥ त्रासजननममपि तत्त्वविदां यस्मादयः उत्कर्षो येन तत्तथोक्तं ॥ किं च तत्त्वविदां मपि लोहितार्थं तत्त्वं
जानतामपि त्रासजननं भयंकरं ॥ वपुरुवाह ॥ वहति स्म ॥ न चैतच्चित्रमित्याह ॥ किमिति ॥ यन्मनस्विभिर्न सुकरं ॥ नास्ति किमिव तन्न किमपीत्यर्थः ॥ इव शब्दो वा
क्यालंकारे ॥ मनस्विनामिति पाठे पि शेषषष्ठी ॥ स्यादेवं कृथोग सरणापान लोकस्यादिति निषे

॥ २ ॥ भार

न

ज्वलत इति॥ विजयी सोऽर्जुनः॥ अनुनिशीथं॥ अर्द्धरात्रे॥ विभक्त्यर्थेऽव्ययीभावः॥ अर्द्धरात्रनिशीथौ द्वौ इत्यमरः॥ ज्वलनो दीप्यमानादनलादधिकरुचिस्त-
पांभसांनिधेः धैर्य्यं गांभीर्य्यं तदेव गुणः॥ नमर्जयन्॥ किं च शैलततः॥ शैलादपि समुन्नततरो दृश्यते॥ अत्र तत्त्वादिभिरनलाद्याधिक्यासंबंधाभिधानाद-
तिशयोक्तिरलंकारः॥ ७॥ जपत इति॥ सदा उपांशु रहस्युक्तमित्यर्थः॥ रहस्योपांशु चालिंगे इत्यमरः॥ करणवद्शब्द मनुप्रयोगः॥ उपांश्विति को

ज्वलनोऽनलादनुनिशीथमधिकं रुचिरंभसां निधेः॥ धैर्य्यगुणमवजयन्विजयी ददृशे समुन्नततरः स शैलतः॥ ७॥
जपतः सदा जपमुपांशु वदनमभितो विसारिभिः॥ तस्य दशनकिरणैः शुशुभे परिवेषभीषणमिवार्कमंडलं॥ ८॥
कवचं स बिभ्रदुपवीतपदं निहितं सज्यकार्मुकः॥ शैलपतिरिव महेंद्रधनुः परिवीतभीमगहनो विदिद्युते॥ ९॥

ना
गौरललहरां॥ जपत इति जपं मंत्रमित्यर्थः॥ जपतः पठतस्तस्यार्जुनस्य वदनं कर्तृ॥ अभितो विसारिभिर्दशनकिरणैर्हेतुभिः॥ परिवेषभीषण-
र्कमंडलार्कमिव शुशुभे॥ परिवेषस्तु परिधिरुपसूर्य्यकमंडले इत्यमरः॥ ८॥ कवचमिति॥ कवचं॥ वर्म बिभ्रत्॥ उपवीतपदे॥ यज्ञोपवीतस्थाने
निहितं न्यस्तं कार्मुकं येन सज्यकार्मुकः॥ सोऽर्जुनो महेंद्रधनुषा परिवीतं॥ परिवेष्टितं॥ भीमं गहनं यस्य स शैलपतिरिव विदिद्युते॥ ९॥ ॥रामजी॥

प्रवेशेति नियमसवनाय ॥ नित्यस्नानाय ॥ सवनं यज्ञने स्नाने सोमनिर्दलनेपि चेति विश्वः ॥ गच्छतः ॥ कृशस्य ॥ तस्यार्जुनस्य पदैः ॥ पादन्यासैः ॥ विनमितो हिमवान् ॥ गां भुवं ॥
प्रविवेशेत्युत्प्रेक्षा ॥ ननु कृशस्य कथमियद्गौरवं तत्राह गुणाः ॥ स्वाराद्यो गुरुतां नयंति ॥ प्रापयंति ॥ संहतिः संघातो मूर्त्तिरिति यावत् ॥ न नयंति ॥ अतः सारान्द्रि गौरवं भवति ॥ न
तु बाह्यात्स्थौल्यात् ॥ अत्र च हेमपिंडतूलपिंडावेव निदर्शनमिति भावः ॥१॥ परिकीर्णमिति ॥ उद्यतभुजस्योर्ध्वबाहोस्तस्य शिरस उपरि ॥ षष्ठ्यंतसमासार्थे ॥ असमर्थप्रत्यये ॥

प्रविवेश गामिव कृशस्य नियमसवनाय गच्छतः ॥ तस्य पदविनमितो हिमवान् गुरुतां नयंति हि गुणा न संहतिः ॥ १० ॥ परि
कीर्णमुद्यतभुजस्य भुवनविवरे दुरासदं ॥ ज्योतिरुपरि शिरसो विततं जगृहे निजान्मुनिदिवौकसां पथः ॥ ११ ॥ रजनीषु
राजतनयस्य बहुलसमयेपि धामभिः ॥ भिन्नतिमिरनिकरं न जहे शशिरश्मिसंगमयुजा नभः श्रिया ॥ १२ ॥

नेति षष्ठी ॥ विततं विस्तृतं भुवनयोर्विवरे ॥ द्यावापृथिव्योरंतराले ॥ परिकीर्णं व्याप्तं ॥ दुरासदं ॥ दुर्धर्षं ॥ ज्योतिस्तेजो मुनीनां दिवौकसां च ॥ निजान्नियता
न् ॥ पथो मार्गान् ॥ जगृहे ॥ जग्राह ॥ प्रतिबंधेनेत्यर्थः ॥ ११ ॥ रजनीष्विति ॥ बहुलसमये कृष्णपक्षेपि ॥ रजनीषु ॥ राजतनयस्य ॥ अर्जुनस्य धामभिस्तेजोभिर्भिन्नस्ति
मिरनिराकरो यस्य तन्नभसः ॥ शशिरश्मीनां ॥ संगमेन हेतुना युज्या ॥ संगतया श्रिया तच्छ्रीतुल्यया श्रियेत्यर्थः ॥ अत एव निदर्शनालंकारो यं ॥ न जहे ॥ न त्यक्तं ॥

॥कि॰का॰टी॥
॥घं॥स॰१२॥
४३॥

17

महतेति॥ जिस्नोरर्जुनाज्जन्मयस्यतेन जन्मांतरपदत्वाद्यधिकरणो बहुव्रीहिः॥ महतामयूषनिचयेन शमितरुचिः नभसभेमुभालिनोवपुरर्कविंबं हीनं जित्वा लज्जितमिवेत्युत्प्रेक्षा॥ वीतमले विमले मेघनीहाराद्यावरणरहितेपीत्यर्थः॥ नभसि न विराजते स्म॥ २३॥ नमितिः॥ उदीरिता उद्धता॥ ग्रतणाजटानामंशावो यस्यतं मधिगुणं॥ आधिज्यं शरासनं यस्यतं तमर्जुनमासुरीरसुरसंबंधिनीः॥ पुरीमिमंथिषु॥ मथितुमिच्छु॥ मुमूर्षः सनंतादुःप्रत्ययः॥ नयात्र्यगुरिता॥ ललाटदृग्पस्यतं सा तागात्रिपुरविजयोद्यतमभालातंरुद्रमिव ददृशुः॥ अत्र भालातस्यरुद्रस्या संभवात्॥ तत्र सिद्धोपमानासिद्धेर्नयनुपमाकिंतु उत्प्रेक्षा॥ सा चाभालाक्षत्वमित्युपमानदुपमेयस्य न्यूनकथनार्थेऽ

महतामयूषनिचयेशमितरुचिर्जिष्णुजन्मना॥ ह्रीतमिवनभसिवीतमलेनविराजतेस्मवपुरंशुमालिनः॥ २३॥ नमुदीरितारुणजटांशुमधिगुणशासनंजना॥ रुद्रमनुदितललाटदृशंददृशुर्मिमंथिषुमिवासुरीपुरः॥ २४॥ मरुतांपतिःस्विदहिमांशुरुतपृथुशिखःशिखीतपः॥ तप्तुमसुकरमुपक्रमतेनजनोयमित्यवयवेसतापसः॥ २५॥

न्वयव्यतिरेकेणाजीविते त्पनयोरं

गांगिभावेनशंकरः॥ उपमानुप्रजननश्चलंकारेणालंकारध्वनिः॥ २४॥ मरुतामिति॥ मरुतांपतिः॥ स्विदनदेवेंद्रो वा॥ अहिमांशुः स्विनसूर्यो वा पृथुशिखो महाज्वालः॥ शिखी स्वित॥ पावको वा॥ असुकरं दुःकरं तपस्तप्तुमुपक्रमते॥ अयंपुरुषः॥ जनः॥ कश्चिन्न प्राकृतेनानेति॥ सोर्जुनस्तापसैस्तपस्विभिः॥ अवयवे॥ तिमन्वर्षयोरण्प्रत्ययः॥ अवयवे॥ अवगतः॥ पातेरवपूर्वात्कर्मणिलिट्॥ अत्रेंद्रत्वादिकर्मारोप्यजनत्वापवादात्साम्यारोप्यापह्नवालंकारः॥ सामान्यलक्षणं

नुनिरिक्तविषयेसाम्यारोपोपह्नव इति॥ २५॥

॥२५॥

त्रेति ॥ दूरगं व्यापकमित्यर्थः ॥ हरितनयस्य धाम तेजो भूरुहवनानि नदद्दाह ॥ अग्निवदिति भावः ॥ तथाप्यपः ॥ परिशोषं न नयति स्म ॥ अर्कवदिति भावः ॥ तथापीति शेषः ॥ सि
द्धाश्रतापसाश्रितेः ॥ सुसहं च न बभूव ॥ अतोऽस्यालौकिकं तेज इति भावः ॥ अत एव दुःसहत्वं ॥ दाहकघनकत्वयोर्विरोधाभासोऽलंकारः ॥ आभासत्वे विरोधस्याविरोधालंकृति
मिनेतिलक्षणात् ॥ २६ ॥ विनयमिति ॥ अथोऽनंतरं ॥ अशरणा महर्षयः ॥ विनयं शिक्षां गुणा ॥ शौर्यादय इव ॥ आशिक्षितत्वसनद्धवादिति भावः ॥ नीतिः षाड्गुण्यप्रयोगः ॥ नीयते ऽ

नददाह भूरुहवनानि हरितनयधाम दूरगं ॥ न स्म नयति परिशोषमपः सुसहं बभूव च मिद्धनापसैः ॥ २६ ॥ विनयं गुणा इव विवेकमप

नयभिदं नया इव ॥ न्यायमवधय इवाशरणाः शरणं ययुः शिवमथो महर्षयः ॥ २७ ॥ परिवीतमंशुभिरुदस्तदिनकरमयूखमंडलैः ॥

शंभुमुपहतदृशः सहसा न च ते निरीक्षितुमभिप्रसेहिरे ॥ २८ ॥ नेनेतिन्यायः नियामकप्रमाणं तमवधय समया इव अप्रामाणि

कस्य समयोल्लंघित्वादिति भावः ॥ शिवं ॥ शरणं रक्षितारं ॥ शरणं गृहरक्षित्रोश्च इत्यमरः ॥ ययुः शरणत्वेन प्रापुरित्यर्थः ॥ अशरणा शरणमिति चोपमास्वपि यथायो

ग्यं योज्यं उपमालंकारोऽयं ॥ २७ ॥ परिवीतमिति ॥ उदस्तं दिनकरमयूखमंडलं यैस्तैः सूर्यतेजोविजयिभिरित्यर्थः ॥ अंशुभिस्तेजोभिः ॥ परिवीतं शंभुं उपहतदृशः

प्रतिहतदृष्टयस्ते महर्षयः ॥ सहसा झटिति निवारयितुं ॥ निशामयितुं द्रष्टुमित्यर्थः ॥ दृष्टपूजा निशामनयोरिति शकधृषेत्यादिना तुमुन् ॥ नाभिः प्रसेहिरे ॥ न श

कुः ॥ २८ ॥ अथेति ॥ अथ दृष्ट्युपघातानंतरं भूतभव्यभवतां ॥ भूतभव्यभवतां ॥ भूतभविष्यवर्त्तमानानामीशं देवमभिमुखयितुं ॥ अभिमुखीकर्तुं ॥ कैतस्त

॥कि॰॥का॰॥टी॥
॥वृं॰॥स॰॥१२॥
॥४॥

वाः कृतत्तोत्राः संतः॥ ननु अन्यपेतिभावः स्तवः स्तोत्रं नुतिर्नुतिरित्यमरः॥ नत्र महसि॥ तेजसि कमनीय विग्रहं रम्यमूर्त्तिमयुग्मानि त्रीणि लोचनानि यस्य तं पुरुषं ददृशुः॥१८॥
अथ पंचभिः॥ पुरुषं विशिनष्टि॥ ककुद इति॥ स्थितमिति॥२१॥ अनुजान्विति॥२२॥ परिणाहिनेति॥२३॥ भुजेति॥२४॥ आदि कुलकं॥ ककुद इति॥ कीदृशं पुरुषं॥ अकृशेनम
हता परिणाहेन विशालतया शालत इति तथोक्ते॥ परिणाहो विशालतेत्यमरः॥ वृषस्य वृषभस्य ककुदे अंसकूटे॥ आसृयी कृत इति शेषः॥ आर्द्र चंदने उमायाः कुच
युग्ममंडल इव लग्न बाहुं न्यस्तहस्तं॥ अत एव स्पर्शसुखमनुभवंतं॥ ककुद्यतथाविधस्पर्शसुखत्वादि भावः॥ उपमालंकारः॥२०॥ स्थितमिति॥ उन्नते तुहिनशै

अथ भूतभव्यभवदीशमभिमुखयितुं कृतस्तवाः॥ तत्र महसि ददृशुः पुरुषं कमनीयविग्रहमयुग्मलोचनं॥१९॥ ककुदे
वृषस्य कृतबाहुमकृशपरिणाहशालिनि॥ स्पर्शसुखमनुभवंतमुमाकुचयुगमंडल इवार्द्रचंदने॥२०॥ स्थितमुन्नते तुहि
नशैलशिरसि भुवनातिवर्त्तिना॥ साद्रिजलधिजलवाहपथं सदिगश्नुवानमिव विश्वमोजसा॥२१॥

लशिरसि॥ हिमवतः शिखरे स्थितं॥ कचित्कोणे स्थितमित्यर्थः॥ तथापि भुवनातिवर्त्तिना॥ सर्वलोकातिशायिना॥ ओजसा॥ अद्रिभिः॥ जलधिभिः
जलवाहपथेनाकाशेन च सहवर्त्तन इति तथोक्तं॥ दिग्भिः सहवर्त्तन इति सदिक्॥ उभयत्रापि तेन सह इति तुल्ययोग इति बहुव्रीहिः॥ विश्वमश्नुवानं
[redacted] ॥ आनुवंतमिवेत्यर्थः स्थितमित्युत्प्रेक्षा॥ अश्नुङ् व्याप्ताविति धोतोः शानच्॥ ॥२१॥ राम॥

१२९

अनुजान्विति ॥ जानुनोर्मध्ये ॥ अनुजानमध्यं ॥ विभक्त्यर्थेऽव्ययीभावः ॥ असक्तं लग्नं ॥ वित ॥ आयतं चैव वपुर्यस्य तेन महाहिना ॥ अवसक्तकायं बंधभूतेनेत्यर्थः ॥ अधिवेष्टित
मतएव ॥ रवितेजसामवधिना ॥ पर्यंतभूतेन महीभृता ॥ लोकालोकाचलेनाभिवेष्टितमखिलं लोकमिव स्थितमित्युपमा ॥ अस्य पर्यपश्यापरभागो लोकाचलः
त्यागमः ॥ २२ ॥ परिणेति ॥ पुनरनुहिनराशिविशदमुपवीतसूत्रतां नीतमुरगमनुरंजयता शितनागमवे ॥ द्विशदं शुभ्रं ॥ उपवीतसूत्रतां ॥ यज्ञोपवीतत्वं नीतं प्रापि

अनुजानुमध्यमसक्तविततमवपुषामहाहिना ॥ लोकमखिलमिवभूमिभृतारवितेजसामवधिनाधिवेष्टितं ॥ २२ ॥
परिणाहिनातुहिनराशिविशदमुपवीतसूत्रतां ॥ नीतमुरगमनुरंजयताशितनागलेनविलसन्मरीचिना ॥ २३ ॥
स्रुतमालतीसितकपालकुमुदमुरुद्धमूर्द्धजं ॥ शेषमिवसुरसरित्पयसांशिरसाविकाशिधामविभ्रतम् ॥ २४ ॥

तं उरगं शेषाहिमनुरंजयता स्वगुणोपरक्तं कुर्वता श्यामीकुर्वतेत्यर्थः ॥ परिणाहिना विशालेन विलसन्मरीचिना शितिना नीलेन कंठेनोपलक्षितं ॥ कं
ठगलौ ग्रीवायामित्यमरः ॥ अत्रोरगस्य स्वधर्मत्यागेनान्यजन्मनीलिमग्रहणात्तद्गुणालंकारः ॥ स्वगुणत्यागादन्योत्कृष्टगुणाहृतिस्तद्गुणः ॥ २३ ॥
स्रुतेति ॥ पुनश्च ॥ मालती जातिकुसुमं ॥ सुमना मालती जातिः ॥ पुष्पजातिप्रभृतयः स्वलिंगाः ब्रीह्यः फले इति चामरः ॥ तद्वत्सितं यत्कपालमेव कुमुदं तत्त ॥

स्तुनमाप्लुतंयेनसस्तंनतपोन्नतं॥अवरुद्धमूर्द्धव्याप्ताशिरोरुहो॥अतएवसुरसरित्पयसांशेषमिवनिर्यातं(शि)हेशुंगांगमंभश्शवस्यितंमित्यर्थः॥उत्प्रेक्षालंकारः॥विसा
रिविसृत्वरंशशिधामशिरसाविभ्रतंपुरुषंदहशुरितिशेर्वेणसंबंधः॥२४॥अस्यश्लोकस्यटीकानलिपितान्यपुस्तकेदृष्ट्वं॥५॥कुलकं॥मुनयेति॥ततो
दर्शनानंतरं॥मुनयोऽभिमुखमेत्य॥नयनविनिवेशेन॥नेत्रसंज्ञयाचोदिताः प्रेरिताःसंतः॥पांडुतनयस्यअर्जुनस्यतपसाजनितं॥तत्सर्वांकं॥जगताम

वहुभिश्चवाहुभिरहीनभुजगवलयैर्विराजितं॥चंदनतरुभिरिवालघुभिर्धवलायितैर्मलयमेदनीभृतं॥२५॥

मुनयस्ततोभिमुखमेत्यनयनविनिवेशचोदिताः॥पांडुतनयतपसाजनितंजगतामशर्मभृशमाचचक्षिरे॥२६॥

नरसैवकोपिभुवनेकपुरुषपुरुषस्तपस्यतिः॥ज्योतिरमलवपुषोपिरवेरभिभूयवृत्रइवभीमविग्रहः॥२७॥

शर्मासुखंदुःखमित्यर्थः॥शर्मशातसुखानिचेत्यमरः॥अशंसस्यगाचचक्षिरे॥२६॥नरसेति॥हेभुवनैकपुरुष॥वृत्रो॥वृत्रासुर॥इव॥भीमवि
ग्रहः॥कोप्यविज्ञानइत्यर्थः॥पुरुषस्तरसावलात्कारेणैव नरसीवलरंहसीतिविश्वः॥अमलवपुषः॥ऊर्जस्वलमूर्त्ते रवेरपिज्योतिर ॥१२७॥
॥भिभूयतपस्यति॥तपश्चरति॥कर्मरोगारोमंथतपोभ्यांवर्त्तिचराविति॥२७॥

स इति ॥ ~~स धनुर्महेषुधि बिभर्त्ति कवचमसिमुग्रमंजटः वल्कलमाजिनमतिचित्रमिदं~~ ॥ किंच स पुरुषो ॥ महांता विषुधी यस्य तन्महेषुधी धनुः ॥ कवचं ॥ वर्म ॥ उग्र
ममसिं खड्गं जटः ॥ वल्कं चीरमजिनं चर्म बिभर्त्ति ॥ इत्येवं रूपमिदं ॥ विरुद्धवेषधारणं मुनिनात्ता विरोधि तथाप्यस्य न राजत इति ॥ न किंतु राजत एवेत्यर्थः ॥ किमा
श्रयसंभावनिषेधनिवर्त्तने द्वौ निषेधाविति वामनः ॥ २७ ॥ चलन इति ॥ किंच ॥ तस्य पुंसश्चलनेऽवनिश्चलति ॥ तथा करणानियमे ॥ समाधीविंद्रियनि

सधनुर्महेषुधी बिभर्त्ति कवचमसिमुग्रमंजटः ॥ वल्कलमजिनमतिचित्रमिदं मुनिनाविरोधि न च नास्य राज
ते ॥ २८ ॥ चनेवत्तिश्चलति तस्य करणानियमेन्यदिग्मुखं ॥ लभमनुभवति शांतमरुद्ग्रहतावकाशगणयुतं नभस्तलं ॥ २९ ॥

रोधे सति ॥ करणं साधकतमं तेत्र गोत्रेन्द्रियेष्वपीत्यमरः ॥ शांतैस्तिमितैर्मरुतां वायूनां ग्रहाणां सूर्यादीनां तारकाणां नक्षत्राणां च गणैर्युतं नभ
स्तलं ॥ स दिग्मुखं ॥ दिग्मुखसहितं लंभं निश्चलत्नामनुभवति व्रजतीत्यर्थः ॥ अतो विश्वातिशायिन्यस्य शक्तिरुपलभ्यत इति भावः ॥ न चैतदुपेत्य
मित्याशयेनाह ॥ २९ ॥ स इति ॥ स पुमानोजसा विजितसारं निरस्तसत्वं ॥ अमरुदिनिजोपसाहितं ॥ सुरासुरोपसाहितं ॥ नादिदं ॥ विश्वं पुरा ॥ अपिद
धाति ॥ अपिधास्यतीत्यर्थः ॥ शीघ्रमवहसीष्वतीत्यर्थः ॥ निकटागामिके पुरेत्यमरः ॥ यावत्पुरानिपातयोर्लट् ॥ तथाहि यत्त्ववनुतपसा

॥कि॰॥का॰॥टी॰॥
॥ग्रं॰॥स॰॥१२॥
॥६॥
२०

मदुष्करं नास्तिकिमिवास्ति॥नकिंचित्तेनदुष्करमस्तीत्यर्थः॥सामान्येनविशेषस्यसमर्थनरूपोर्थान्तरन्यासः॥३०॥नचैतदल्पफलकंकंपनइत्याह॥विजिगी
षतइति॥सपुरुषोजगंतियुगपद्विजिगीषतेयादेविजेतुमिच्छति॥पूर्ववत्सनइत्यात्मनेपदं॥अथयुगपत्संजिहीर्षतिसंहर्तुमिच्छतिवा॥अभवमपवर्गं
प्राप्तुमभिवांछतिवानविपर्ययइतिशेषः॥किंतुमयमपसरूपः॥तेजांसि॥विषहितुंसोढुं॥जीवसहल्लुभरूषरिषइतिविकल्पादिडागमः॥नोक्षमः॥

सन्तदोजसाविजितसारममरदितिजोपसंहितं॥विश्वमपिदधातिपुराकिमिवास्तितेनवयन्नदुष्करम्॥३०॥
विजिगीषतेयदिजगंतियुगपदथसंजिहीर्षति॥प्राप्तुमभवमभिवांछतिववयमसनोविषहितुंत्तमारुपः॥३१॥
किमुपेत्तसेकथयनाथननवविदितंनकिंचन॥यातुमलमभयदार्हसिनस्त्वयिमास्मशपसतिभवन्पराभवः॥३२॥

नसक्ताः॥केचिदत्ररूचः॥कामिनानिविषहितुं॥अवधारयितुंमावहते॥नत्रसहेरवधारवधारणार्थत्वंविचार्य्यं॥३१॥किमितिहेनाथ॥
किमर्थमुपेत्तसेकथयत्वमितिशेषः॥नवनविदितं॥त्वया॥अज्ञायमानमित्यर्थः॥क्तस्यवर्त्तमानेषष्टी॥किंचननाकिमपिन॥अभयदनोऽस्मा
न्॥अलं॥त्रातुमर्हसि॥त्वयिशासति॥सति॥पराभवोमास्मभवत्॥माभूत्॥स्मोत्तरेलङ्चेति॥लङ्॥नमाङ्योगे॥इत्यडागमः॥प्रतिषेधः॥३२॥ ॥१३७॥

इतीति ॥ इतीत्थं गां वाचं विधायाभिधायेत्यर्थः । सामान्यस्य विशेषपर्य्यवसानात् । मुनिषु विरतेषु तूष्णीभूतेषु सत्सु अथ कांतकः शिवः भिन्नस्योद्वेलस्य जल
धेर्जलस्य नादवत् ॥ गुरु गंभीरं यथा तथा दिशां विवरमंतरालं ध्वनयन् । वचनमाददे ॥ वाचकार ॥ उवाचेत्यर्थः ॥ ३३ ॥ वदरीति ॥ वदरीतपोवने ॥ वदरिकाश्र
मे निवासनिरतं ॥ नित्यनिवासिनं मां भुवमवतीर्णं जगतां निधने सृष्टिसंहारौ धातुस्तपः कर्त्तरीत्यर्थः ॥ तान्नितिदधानेन त्वमात्मयः ॥ अत एव नलो
इति गां विधाय विरतेषु मुनिषु वचनं समाददे ॥ भिन्नजलधिजलनादगुरु ध्वनयन् दिशां विवरमथ कांतकः ॥ ३३ ॥
वदरीतपोवननिवासनिरतमवयात मान्यथा ॥ धातुरुदयनिधने जगतां नरमंशमादिपुरुषस्य गां गतम् ॥ ३४ ॥
द्विषतः परासिसिषुरेष सकलभुवनाभितापिनः ॥ कांतकुलिशकरवीर्य्यबलान्मदुपासनं विहितवान्महत्त
केत्यादिना कर्मणि षष्ठीप्रतिषेधः ॥ आदिपुरुषस्य विष्णोरंशभूतं नरं नरसंज्ञकमित्यर्थः ॥ यो नारायणः स एवायमिति भावः ॥ अन्यथा उक्तवैपरी
त्येन मावगात मानुषं मा जानातेत्यर्थः ॥ इणो लुङीति गादेशः ॥ ३४ ॥ द्विषत इति ॥ एष नरः सकलभुवनान्यभितापयंति ॥ अभीक्ष्णमिति तथोक्ता
न् ॥ बहुलमभीक्ष्ण्यमिति णिनिः ॥ कांते आक्रांते कुलिशकरस्येंद्रस्य वीर्य्यबले शक्तिसैन्ये यस्मात्तान् द्विषतः शत्रून् ॥ पराशिषु ॥ परासितुमिच्छुः ॥ अस्यतेः स

॥ कि॰ ॥ का॰ ॥ टी॰ ॥

॥ ये॰ ॥ स॰ ॥ १२ ॥

॥ १७ ॥

न्नेनादुः अन्वयः ॥ मदुपासनं ॥ मदाराधनं ॥ करोत्विन्द्र ॥ महत्तपो विहितवान् ॥ अत निमित्तं शत्रुघ्नीत्येव ॥ २५ ॥ अथास्य मानुषावतारे कारणमाह ॥ अयमिति

विभुः प्रभु ॥ अयं नरः ॥ अच्युतः ॥ कृष्णश्च ॥ सरसिरुहजन्मनो ब्रह्मणो वचनेन प्रार्थनया ॥ असुराणां निधनेन क्षरणेन ॥ प्रजाः पातुं ॥ भुवमभ्युपेत्य मनुजे

षु तिष्ठतः ॥ वस्तुतस्तु सात्ताविनरनारायणावतारौ ॥ कृष्णार्जुनाविस्मयः ॥ २६ ॥ अथास्य सत्त्वसंपदं प्रकाशयितुमाह ॥ सुरेति ॥ मूकदानवो दानवः ॥

अयमच्युतश्च वचनेन सरसिरुहजन्मनः प्रजाः ॥ पातुमसुरनिधनेन विभू भुवनमभ्युपेत्य मनुजेषु तिष्ठतः ॥ २६ ॥

सुरकृत्यमेनमवगम्य निपुणमिति मूकदानवः ॥ हन्तुमभिपतति पांडुसुतं त्वरया न दत्र सहगम्यतां मया ॥ २७ ॥

विवरेऽपि नैनमनिरूढमभिभवितुमेष पारयन् ॥ पापनिरतिरविशंकितया विजयं भवस्य तिवारशहमायया ॥ २८ ॥

कश्चिदसुरः ॥ एनं पांडवं कृत्यं ॥ सुरकृत्यमिति ॥ निपुणमवगम्य साधु निश्चित्य पांडवसुतमर्जुनं हंतुं अभिपतति ॥ तत्तस्मात्कारणाद्यत्रार्जुनाश्रमे

विषये ॥ आश्रमं प्रतीत्यर्थः ॥ मया सह त्वरया गम्यतां ॥ द्रष्टुमिति शेषः ॥ २७ ॥ विवरेति ॥ पापनिरतिर्यस्य स एक दानवो विवरे रंध्रेऽपि ॥ एकांतेऽपीत्य

र्थः ॥ एनं पांडवं ॥ अनिरूढं ॥ प्रकटमभिभवितुं न पारयन् ॥ न शक्नुवन् ॥ विभाषया त्रितिनञ्समासः ॥ अविशंकितया ॥ त्वरूपगूहन्नाल्लिंगाकि

गृह्

ततः किमित्याह॥ निहते रिपौ॥ विडंबितमनुकृतं॥ किरातनृपतिवपुर्येन एवंविधेन मया निहते रिपौ वराहे मुक्तनिशितविशिखः सन्॥ अयं पांडवः॥ प्रसभं प्रसह्य मृ
गयाविवादं मृगप्रहारकलहमाचरिष्यति करिष्यति॥ मया हतमेव मृगं प्रहितास्त्रयमहमेव प्रवर्त्तेति॥ कलहयिष्यत इत्यर्थः॥ ३९॥ ततोपि किं भावीत्यत्राह॥
तपसेति॥ तपसा नितरां पीडितः॥ अत एव कृशस्तस्य निपीडितकृशस्य॥ पूर्वकालेत्यादिना समासः॥ तथा विरहिता॥ सहायसंपत् यस्य तस्यैकाकिनः॥ मृधे॥

निहते विडंबितकिरातनृपतिवपुषा रिपौ मया॥ मुक्तनिशितविशिख प्रसभं मृगयाविवादमयमाचरिष्यति॥ ३९॥
तपसा निपीडितकृशस्य विरहितसहायसंपदः॥ सत्त्वविहितमतुलं भुजयोर्बलमस्य पश्यत मृधेधिकुप्यतः॥ ४०॥

रणे मृधमास्कंदनं संख्यमित्यमरः॥ अधिकुप्यतोऽधिकं कुप्यतोऽस्य पांडवस्य सत्त्वविहितं स्वभावकृतं॥ स्वाभाविकमित्यर्थः॥ सत्त्वोऽस्त्री
जंतुक्लीबेव्यवसाये पराक्रमे॥ आत्माभावे पिशाचे च द्रव्ये सत्ता स्वभावयोः॥ आरोगबलेंतःकरण इति वैजयंती॥ अतुलं भुजयोर्बलं पश्यत
मैन्यमिति शेषस्तत्र॥ ४०॥ अथ त्रिभिरस्य किरातभावं वर्णयति॥ इतीति॥ ४१॥ वदनेति॥ ४२॥ बृहदिति॥ इतीति॥ शिवस्तान् मुनीन्॥ उदारयु
क्तियुक्तमनुनीय रुचिरः॥ किरातपृतनापतिः॥ सन्नद्ध इत्यन्वयः॥ किरातसेनापति वेषधारी बभूवेत्यर्थः॥ कथंभूतः॥ विषमा विकृते नित्यासाः॥

॥ कि॰ का॰ टी ॥
॥ पं॰ स॰ ॥ १२ ॥
॥ ८ ॥

हरिचंदनालयोरेखायस्मिंस्तेन घर्मेण स्वेदेन जनिताः पुलकायस्मिन् ॥ घर्मः स्यादातपे ग्रीष्म उष्मस्वेदांभसोरपीति विश्वः ॥ लसंतो गजमौक्तिकानां
गजकुंभोद्भवमौक्तिकानामावलय एव गुणाः सूत्राणि यस्मिन् तेन वक्षसोपलक्षितः ॥ करिरदामुक्तायोनित्वमाहागस्त्यः ॥ जीमूतकरिमत्स्या
हवंशशंखवराहजाः ॥ शुक्त्युद्भवाश्च विज्ञेया अष्टौ मौक्तिकयोनयः ॥ इति ॥ वदनेति ॥ पुष्पैर्लतांतैर्लताग्रैर्नियमिता संयता ॥ विलंबिनश्च मौल

इतिनानुदारमनुनीयविषमहरिचंदनालिना ॥ घर्मजनितपुलकेन लसद्गजमौक्तिकावलिगुणेन वक्षसा ॥ ४१ ॥
वदनेन पुष्पितलतांतनियमितविलंबिमौलिना ॥ बिभ्रदरुणनयनेन रुचं शिखिपिच्छलांछितकपोलभित्तिना ॥ ४२ ॥
बृहदुद्वहन् जलदनादि धनुरुपहितैकमार्गणं ॥ मेघनिचय इव संवहनरुचिरः किरातपृतनापतिः शिवः ॥ ४३ ॥

यः केशपाशो यस्य तेनारुणनयनेनारक्तनेत्रेण च शिखिपिच्छेन मयूरकलापेन लांछिता चिह्निता ॥ कपोलभित्तिर्यस्य तेन वदनेन रुचं
शोभां बिभ्रत् ॥ ४२ ॥ बृहदिति ॥ पुनश्च जलद इव नदतीति जलदनादि ॥ कर्तर्युपमान इति णिनिः ॥ उपहित एको मार्गणो संहित एकः बा
णो ॥ धनुरुद्वहन् ॥ अत एव मेघनिचय इव नदतीति ॥ जलदनादि कर्तर्युपमान इति णिनिः उपहित एकमार्गणं संहितैकबाणं ॥ स्थित

अनुकूलमिति ॥ अस्यार्जुनस्यानुकूलं विचिंत्य प्रियमिति निश्चित्य ॥ आत्तविग्रहैः गृहीतकिरातदेहैः ॥ तथा शूलानि ॥ परशवः ॥ कुठाराः ॥ शराश्च चापानि च भृतानि यैः
स्तैः ॥ प्रहरणार्थेभ्यः परे निष्ठासप्तम्याविति निष्ठायाः परनिपातः ॥ गणपतिभिः ॥ प्रमथमुख्यैः ॥ महती वनेचरचमूः विनिर्ममे ॥ विनिर्मिता ॥ माङ् कर्मणि लिट् ॥ ४४ ॥
विरचय्येति ॥ अथेश्वराज्ञया ॥ अनुगिरं ॥ गिरेः ॥ विभक्त्यर्थेऽव्ययीभावः ॥ गिरेश्चसेनकस्येति समासांतः ॥ काननविभागं विरचय्य ॥ अस्यायमिति देशविभा

अनुकूलमस्य च विचिंत्य गणपतिभिरात्तविग्रहैः ॥ शूलपरशुशरचापभृतैर्महती वनेचरचमूर्विनिर्ममे ॥ ४४ ॥ वि
रचय्य काननविभागमनुगिरमथेश्वराज्ञया ॥ भीमनिनदपिहितोरुभुवः परितोऽपदिश्य मृगयां प्रतस्थिरे ॥ ४५ ॥
क्षुभिताभिनिःसृतविभिन्नशकुनिमृगयूथनिःस्वनैः ॥ पूर्णपृथुवनगुहाविवरः सहसा भयादिव ररास भूधरः ॥ ४६ ॥

गं कृत्वेत्यर्थः ॥ भीमैर्निनादैः कलकलैः ॥ पिहिता उरवो भुवो यैस्ते तथोक्ताः सन्तः ॥ मृगयामपदिश्य ॥ व्याजीकृत्य ॥ परितः प्रतस्थिरे ॥ ४५ ॥ क्षुभिते
ति ॥ क्षुभिताश्चलिता ॥ अभिनिःसृता ॥ स्वस्थानान्निःसृता विभिन्ना ॥ मुक्तसंघाताश्च ये ॥ शकुनयो ॥ मृगाश्च तेषां यूथानि तेषां निःस्वनैः ॥
पूर्णानि पृथूनि वनानि ॥ गुहाविवराणि च यस्य स भूधरः ॥ सहसा भयादिव ॥ इत्युत्प्रेक्षा ॥ ररास ॥ चुक्रोशेत्यर्थः ॥ ४६ ॥ रामजी ॥ ॥

॥कि॥टी॥का॥

॥पं॥स॥१२॥

॥९॥

23

नेति ॥ पथि पलायनमार्गे विरोधिनी जातिवैरिणी मृगाणां सिंहव्याघ्रादीनां ॥ विहंगानां काकोलूकादीनां च संहतिः ॥ रुषं परस्परक्रोधं नेयाय
किंतु सहैव चचारेत्यर्थः ॥ तथाहि भूरिः प्रभूताभयासुताः समं साधारण्येन ॥ आगताः ॥ आपदः ॥ सहजमपि वैरं ॥ सपदि ॥ घ्नंति ॥ न हि संपातव्यसनेषु प्रजाय
ने ॥ वैरानुबंधेषु इति भावः ॥४७॥ चमरीति ॥ वंशवितातिषु ॥ वेणुगुल्मेषु ॥ विषक्ताः ॥ भृशं प्रियवालाः ॥ प्रियरोमाणो ॥ वालधयः ॥ पुच्छानि येषां तैः

न विरोधिनी रुषमियाय पथि मृगविहंगसंहतिः ॥ घ्नंति सहजमपि भूरिभियः सममागताः सपदि वैरमापदः ॥४७॥
चमरीगणैर्गणबलस्य बलवति भयेऽप्युपस्थिते ॥ वंशवितातिषु विषक्तपृथुप्रियवालवालधिभिराददे धृतिः ॥४८॥
हरसैनिकाः प्रतिभयेऽपि गजमदसुगंधिकेसरैः ॥ स्वस्थमपि ददृशिरे सहसा प्रतिबोधजृंभितमुखैर्मृगाधिपैः ॥४९॥

पुच्छोऽस्त्री लोमलांगूले वालहस्तश्च वालधिरित्यमरः ॥ चमरीगणैः ॥ गणबलस्य ॥ संबंधिनि न हेतुकर्तृत्व इत्यर्थः ॥ संबंधमात्रविवक्षायां षष्ठी
अन्यथा भीत्रार्थानां भयहेतुरिति पंचमी स्यात् ॥ बलवति सबले भये ॥ उपस्थितेऽप्याप्तेऽपि धृतिराददे ॥ स्वीकृता वालच्छेदभयात् प्राणहानिमप्य
वगणय्य स्थिता इत्यर्थः ॥४८॥ हरेति ॥ भयंकरं प्रतिभयमित्यमरः ॥ आप्तेऽपीति शेषः ॥ गजमदैः ॥ सुगंधयः ॥ सुरभयः केसरा येषां तैः ॥ हत्वानेकगजैरि

त्यर्थः ॥ सहसा ॥ सेनाकलकलश्रवणानंतरमेव प्रतिबोधेन ॥ निद्रापगमेन ॥ जृंभितानि व्याकोशितानि मुखानि येषां तैर्मृगाधिपैः ॥ स्वस्थं निःशंकमेव ॥ हरसैनिका ॥ अ
भिददृशिरे ॥ ईक्षिताः ॥ ननु किंचित्सुभितमित्यर्थः ॥ युक्तं चैतद्राजनामधारिणामिति भावः ॥ ४९ ॥ विभरामिति ॥ अपह्नुतजठरैः ॥ शफरीकुलाकुलाः पंकविषमितनटाः ॥
तत्कालक्षोभात्स्थितोदरैः ॥ शफरीकुलैराकुलाः ॥ पंकैः विषमितानि दुर्गमीकृतानि ॥ नटानि कूलानि यासां ताः सरितः ॥ करिभिः ॥ पल्वलायमानेति विशेषः ॥ रुग्णा
नां मार्गरोधितया भग्नानां ॥ आर्दितक्षोभितनिशानतां ॥ चंदनानां रसेः ॥ रसरुग्णकरिरुग्णचंदनरसाहृतां ॥ पयो विभरां बभूव ॥ बभ्रुः ॥ भीह्रीभृहुवां श्लुवच्चेति वि

विभरां बभूवुरपह्नुतजठरैः शफरीकुलाकुलाः ॥ पंकविषमिततटाः सरितः करिरुग्णचंदनरसारुणं पयः ॥ ५० ॥
महिषक्षतागुरुतमालनलदसुरभिः सदागतिः ॥ व्यस्तशुकनिभशिलाकुसुमः प्रणुदन्ववौ वनसदां परिश्रमं ॥ ५१ ॥

कल्पादावप्ययः रुजचांनुप्रपुष्पनेलिटीति भुवोनुप्रयोगश्च ॥ ५० ॥ महिषेति ॥ महिषैः क्षतानि वदलितानि तैः अगरुभिस्तमालैर्नलदैः
उशीरैश्च सुरभिर्व्यस्तानि विक्षिप्तानि शुकनिभानि शुकसवर्णानि शिलाकुसुमानि शैलेयाख्यानि औषधविशेषा येन सः अतः
शीतलस्पर्शः कालानुसार्यं [illegible] पुष्पं शीतशिवानि मुशैलेयमित्यमरः ॥ शुकनिभेति स्वरूपकथनं ॥ सदागतिर्वायुर्वनसदां वनेचरा

॥कि॰॥का॰॥टी॥
॥ग्रं॥ स॰॥१२॥
॥९॥
९४

प्रथितेति॥सत्वसंप्लवः प्राणिक्षोभोनिदाघोग्रीष्मइवसरसीः सरांसि कासारः सरसीसरः इत्यमरः माथितांभसः संक्षोभितोदकाः रयेण पलायन
वेगेनविकीर्णायथातथा मृदिताः निष्पीडिताः कदल्योगवेधुकाश्चतृणधान्यविशेषाश्च यासांताश्च तथोक्ताः तृणधान्यानिनीवाराःस्त्रीगवेधुका
इत्यमरः मृदितेतिइतिकृतिनिगुणप्रतिषेधः क्लांताजलरुहलतासन्निभे यासुताः एवंभूताविदधे ॥५२॥ इतीति॥ इतीत्यमुमापतिः अचल

प्रथितांभसोरयविकीर्णमृदितकदलीगवेधुकाः क्लांतजलरुहलताः सरसीर्विदधेनिदाघइवसत्वसं
प्लवः ५२ इतिचालयन्नचलसानुवनगहनजानुमापतिः प्रापमुदितहारिणीदशनक्षतवीरुधवस
तिमैन्द्रसोनवीम् ५३

सानुषुवनेषूपभोग्यप्रदेशेषु गहनेषु दावेषुचजातास्तान्तथोक्तान् मृगानितिशेषः
चालयन्मुदितानां हरिणानां दशनैः क्षताः वीरुधोलतायस्यांतां इंद्रसूनोरिमां ऐंद्रसूनवीं वसंत्यत्रेतिवसतिः आश्रमं अ
नुवहिसर्त्तिभुञ्ज्ञेति औणादिकः वसतेः रति प्रत्ययः प्राप ५३ रामजी रामजीसहाय

कि॰ का॰ टी
टे॰ स॰ १२
११

स इति॥ स शिवो घननीलं मेघमेचकं मुनेरभिमुखमुपस्थितमागतं॥ पोत्रस्य॥ मुखाग्रस्य निकषणो नोल्लेखनेन विभिन्ना विदारिता
भूर्येन स तं॥ मुखाग्रं॥ क्रोडहलयोः पोत्रमित्यमरः॥ हलसूकरयोः पुव इति त्रन प्रत्ययः॥ सूकरस्येदं॥ सौकरं॥ वराहं॥ वपुर्दधानं॥ तं दनुजं॥ स्व
कारमभाससाद॥ ५४॥ कच्छांत इति॥ लक्ष्मीवान् मादुपधायाश्च मतोर्वोयवादिभ्य इति मतुपो मकारस्य वकारादेशः स शिवः सुर

सतमाससाद घननीलमभिमुखमवस्थितं मुनेः पोत्रनिकषणविभिन्नभुवं दनुजं दधानमतिशौकरं वपुः ५४ कच्छांतसुरसरितो निधाय सेनामन्वीतः सकतिपयैः किरातवर्यैः प्रच्छन्नस्तरुगहनैः सगुल्मजालैर्लक्ष्मी
म वानुपपदं स संप्रतस्थे ५५

सरितः कच्छांते अनूपप्रांते जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविध इत्यमरः सेनां निधाय कतिपयैः किरातवर्यैः अन्वीतोऽनुगतः सन् ई
गतावितिधातो अनुपूर्वात्कर्मणि क्तः सगुल्मजालैर्लतोप्रतानसहितैः प्रच्छन्नः छादितः वादांतेत्यादिना निपातः अस्य वराहस्य प
दमनुपदं पदानुसारेणेत्यर्थः संप्रतस्थे असमवप्रविभ्यःस्थः इत्यात्मनेपदं प्रस्थितवानित्यर्थः॥ ५५॥ इति श्री महोपाध्याय १८३

॥ किरातस्य द्वादशः सर्गः ॥ पत्रसंख्या ॥ ११

॥१२॥

४२४१ खंडित

पत्रे १८३

ॐ श्रीगणेशाय नमः॥ अथेति॥ अथेन्द्रतिरोधानंतरं॥ रुचिरवदनः॥ इंद्रसाक्षात्कारसंतोषात्॥ प्रसन्नमुखो धनंजयः॥ अर्जुनः॥ वासवस्य वचनेनोपदेशेन॥ त्रिलोचनं क्लांतिरहितं॥ यथा तथा॥ अभिराधयितुं प्रसादयितुं॥ तपांसि विधिवत्॥ विध्यर्हं यथा शास्त्रमित्यर्थः॥ तदर्हमिति वति प्रत्ययः॥ विदधे चक्रे॥ अस्मिन्सर्गेऽद्भुतमाहतं नम्॥ सजसादिमे सलघुकौ च नसजगुरुकेष्वथोद्गता॥ अङ्घ्रिगतभजेन जलगायुक्ता सजसाजगौ॥ चरणमेकतः पठेदिति लक्षणात्॥ १॥ अभीति॥ अभिरश्मिमालि॥ अभिसूर्यं॥ भुव्येकचरणेन निषीदतः॥ विमलस्य बाह्याभ्यंतरशुद्धिमतः॥ धनंजयधृतिर्जयेच्छा येन तस्य॥ अनाश्रुषोऽभुञ्जानस्य॥ उपेयिवाननाश्वाननूचानश्चेति निपातः॥ तस्यार्जुनस्य व

अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनं॥ क्लांतिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनंजयः॥ १॥ अभिर

श्मिमालि विमलस्य धृतजयधृतेरनाश्रुषः॥ तस्य भुवि बहुतिथास्तिथयः प्रतिजग्मुरेकचरणेन सीदतः॥ २॥ वपुरिन्द्रि

योपतपनेषु सततमसुखेषु पांडवः॥ व्याप नगपतिरिव स्थिरतां महतां हि धैर्यमविचिंत्यवैभवम्॥ ३॥ हूतां पूरणा बहुतिथा बहु

संख्या इत्यर्थः॥ तस्य ष्टरणोऽडर्॥ बहुपूगगणसंघस्य तिथुगिति थुगागमः॥ तिथयो दिनानि प्रतिजग्मुः॥ अयातिषिशरत्॥ पुल्लिंगः॥ तदेवाह तिथयोर्द्वयोरित्यभिधानात्॥ अन्यथा बहुतिथा इत्यत्र तिथ्यान्ङीश्स्यात्॥ २॥ वपुरिति॥ पांडवोऽर्जुनः॥ सततः॥ वपुषः॥ इंद्रियाणां चोपतपनेषु संतापकरणेषु॥ करणे ल्युट्॥ असुखेषु अनशनादिदुःखेषु॥ अनगपतिः॥ गिरिराज इव॥ स्थिरतां॥ दार्ढ्यं व्याप प्राप॥ तथाहि॥ महतां॥ धैर्यं॥ अविभाव्यं॥ दुर्बोधवैभवं सामर्थ्यं यस्य तत्तथोक्तं॥ धीरा गणमार्केचित्करं दुःख

[illegible] ॥३॥

घनेति घनेन कठिनेन पोत्रेण मुखाग्रेण विदीर्णा निविदारिताः शालमूला वृक्षबुध्ना येन सः मूलं बुध्नोंघ्रिनामक इत्यमरः निविडस्य निकाषेण कषणेन रुग्ण
वप्रो भग्नसानुः अतो महासत्वसंपन्न इति भावः एकश्चासौ चरश्चेत्येकचरः एकाकी दृप्तारूप्येन इत्यर्थः अतोयं वराहः समराय समरं कर्तुं क्रियार्थोपपदस्य च क
र्मणि स्थानिन इति चतुर्थी समाजुहूषमाण इव समाह्वातुमिच्छन्निव इव शब्दः संभावनायां समाङ्पूर्वात् ह्वयतेः सन्नन्ताच्छानच् प्रत्ययः स्पर्द्धायामाङ् इत्यात्मनेपदं अभ्यस्त
[illegible] चेति संप्रसारणं माम् अभिवर्त्तते अभिधावति उपसर्गवशात्सकर्मकत्वं अतः सर्वथा नापगुपेक्ष्य इति भावः ३

घ
घनपोत्रविदीर्णशालमूलो निबिडस्कंधनिकाषरुग्णवप्रः अयमेकचरोभिवर्त्तते मां समरायेव समाजुहूषमाणः ३
इह वीतभयास्तपोनुभावाज्जहति व्यालमृगाः परेषु वृत्तिं मयि तां सुतरामयं विधत्ते विकृतिः किंनु भवेदियं नु माया ४

इहेति इहाश्रमे तपोनुभावात् वीतभयाल्लक्षणविगतवैरा इत्यर्थः अतः व्यालमृगाः क्रूरमृगाः व्यालो भुजंगमे क्रूरे श्वापदे दुष्टदंतिनीति विश्वः परेषु प्राण्यं
तरेषु वृत्तिं हिंसिकां जहति हिंसया न जीवंतीत्यर्थः अयं वराहो मयि मद्विषये तां वृत्तिं सुतरां विधत्ते जिघांसतीत्यर्थः तदियं विकृतिस्तपः सामर्थ्य
भंगरूपा भवेत् किं नु पक्षमाया कस्यचिद्दैत्यस्याहम्भिका भवेत् किं नु किं नु शब्दो वितर्के ४ एम श्री एम श्रीएम

कि० का० टी०
ग्रं० सं० १३
२

अथवेति अथवेति पक्षान्तरे एष मृगः सर्वजन्मान्तरेभ्यः शमसमर्थमासेवितया अत्यन्तपरिचितया रुषामन्योचरये वक्रुधाकृतज्ञयेव पूर्वसेवां जानत्येव
नोत्सृष्टा न मुक्तः अत्रापि नन्नमितिशेषः न नमयं प्रागभावी पूर्ववैरानुबंधी कश्चित्संजातिवैरवीजासंभवादिति भावः कुतः पदात् आरात्समीपस्थ आ
राद्दूरसमीपयोरित्यमरः विरोधिनीः मृगजातीः स्वधर्मपर्यैवेन मामभिया अन्यथा नाभिधावत इति भावः न केवलमभिधायानमेव किंतु मनोदृष्टिरप्यत्र

अथवैष कृतज्ञयेव सर्वेभ्यः शमासेवितया रुषा न मुक्तः अभूमयविरोधिनीः किमाराम्मृगजातीरभिजाति मां जवेन ५
न मृगः खलु कोप्ययं जिघांसुः स्खलति यत्र तथा मम शं मनो मे विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं वा ६

वेति अयं मृगो न खलु किंतु कोपि कश्चिदन्यः स्वजिघांसुर्हंतुमिच्छुः हंतेः सन्नंतादुः अभ्यासाच्चेति कुत्वं अज्झनगमां सनीति दीर्घः कुतः हि यस्मात्
दन्यस्मिन्नर्थे विषये मे मनस्तथा भृशं स्खलति क्षुभ्यति यथा अयं जिघांसुः इति बुद्धिः हरिते त्यर्थः तथाहि विमलं प्रसन्नं सत् तथा कलुषीभवत् क्षुभ्यच्च
चेतः स्वहितैषिणं मित्रं रिपुं वा अमित्रं च यथाकथयति यत्र मनः प्रसीदति तदेव मित्रमन्यथा त्वन्यदेवेति निश्चितमित्यर्थः अतो यं वध्य इति भावः न
तु मुनेः किंतु तथा तुः शंकयात्र ह० ६ रामः

मुनिरिति मुनिरस्मि अतो निरागसो निरपराधस्य मे कुतो भयमित्येषोऽभिमानः अनपकारिणं मां कोपि किं करिष्यतीति बुद्धिः भवतेषु श्रेयसे न भवति तथा हि परिवृद्धिषु विषयेषु बहुमत्सराणां दुरात्मनां मलंघ्यं किमिवास्ति न किंचिदकार्य्यमस्तीत्यर्थः एवशब्दो वाक्यालंकारे अस्तु जिघांसुरपि क्षुद्रः किं करिष्यतीत्यत्राह ७ राम राम राम श्री रामस्तु०

मुनिरस्मि निरागसः कुतो मे भयमित्येष न भूतयेभिमानः परवृद्धिषु बद्धमत्सराणां किमिव ह्यस्ति दुरात्मनामलंघ्यं ७
दनुजः स्विदयं क्षपाचरो वा वनजे नेति बलं बताऽस्ति सत्वे अभिभूय तथा हि मेघनीलः सकलं कंपयतीव शैलराजं ८

दनुज इति अयं दनुजः स्वित् दानवो वा क्षपाचरो राक्षसो वा न तामसगत इत्यर्थः कुतो वनजेषु सत्त्वेषु प्राणिनीति ईदृशं बलं नास्ति वते त्वाश्चर्ये। बलमेव समर्थयते तथा हि मेघनीलोऽयं वराहः सकलं शैलराजं अभिभूय आक्रम्य कंपयतीव पदविक्षेपभरेण तथा प्रतीयत इत्यर्थः अत्र कंपयतीवोत्प्रेक्षा गर्भीयं शैलकंपनरूपकार्येण तत्कारणबलातिरेकसमर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासः किंच यो यं मृगयाकलबलः श्रयते सोऽप्येतन्मायापरिकल्पित एवेत्याह ८ राम०

कि० का० टी०
पं० सं० १२
३
3

अयमिति अयमेवसमस्थेशांतिनिष्ठेइतिरंध्रोक्तिः मयिअधिकरणविवक्षायांसप्तमी माययाप्रहरिष्यन्प्रहर्तुमिच्छन्नित्यर्थः कर्मणपरम्मृगव्यामा खेटकस्वसत्रंयस्तांतंकामयतइति आखेटकंमृगव्यंस्यादाखेटोमृगयास्त्रियाम् सत्रमाच्छादनेयज्ञेसदादानेवनेपिचेतिचामरः पृथुभिर्ध्वजिनीरवैः सेनाकालकलैः समायाकल्पितैरित्यर्थः काननानिचकितोद्भ्रांतासम्पलायितामृगायेषुतानितथाचकार अतस्त्वरंध्रान्वेषणप्रहारार्थंस्वयमेवमृगव्यभूर्वावनावरोधा यसेनाघोषंकल्पयामासमृगरूपेणायातीत्यर्थः ९ ९ श्रीराम० ९

अयमेवमृगव्यसत्रकामःप्रहरिष्यन्मयिमाययाशमस्थे पृथुभिर्ध्वजिनीरवैरकार्षीच्चकितोद्भ्रांतमृगाणिकाननानि ९

वितर्कांतरमाह० बहुशःकृतसत्कृतेर्विधातुंप्रियमिच्छन्नथवासुयोधनस्य क्षुभितंवनगोचराभियोगाद्गणमाशिश्रियदा
कुलंतिरश्चाम् १०

बहुशइति अथवाबहुशःकृतासत्कृतिःसत्कारोयेनतस्यसुयोधनस्यप्रियंमहंधनूपंप्रतिप्रियंविधातुमिच्छन्नयः कश्चिदितिविशेषः वनेगोचरस्यानंये तेषांवनेचराणामभियोगादवरोधात् क्षुभितमुद्विग्नमाकुलंचलाचलंतिरश्चांगणमाशिश्रियत् वराहरूपेणप्राविक्षत् णिश्रिद्रुस्रुभ्यः कर्तरिचङ् चङि इति द्विर्भावः वितर्कांतरमाह० १० श्रीराम श्रीराम श्रीराम श्रीराम श्रीरामरुक०

आलीढेति। उद्धतेनोद्धुरेण खांडवजातवेदसा खांडववनाग्निना प्रसभमवलीढः सनाभिर्दग्धबंधुः सपिंडास्तु सनाभयः सगोत्रबांधवज्ञातिबंधुस्वस्वजनाः समा इत्य
मरः अतएव समन्युः बद्धवैरः तस्यार्जुनस्यापकारयित्वादिति भावः अश्वसेनस्तु तक्षकपुत्रः कश्चिन्महासर्पः प्रतिकर्तुं वैरनिर्यातनार्थमुपागतो वा वराह मा
मयेति शेषः पुरा किल पांडवैः खांडवदाहे पावकभयपलायमानां स तक्षकसूनोरश्वसेनस्य बंधुं न्यायेन रुरुधे दाहयामासेति महाभारतीकथा अथ द्वाभ्यामनंतर

अवलीढसनाभिरश्वसेनः प्रसभं खांडवजातवेदसा वा प्रतिकर्तुमुपागतः समन्युः कृतवैरो यदि वा वृकोदरेण ११
बलशालितया यथा तथा मे धियमुच्छेदपरामयं दधानः नियमेन मया निबर्हणीयः परमं लाभमरातिभंगमाहुः १२

बलेति किं बहुना यथा तथा वास्तु अयं मायिकः पारमार्थिको वास्त्वित्यर्थः उच्छेदपरां धियं दधानो मां जिघांसुरित्यर्थः अतोऽयं मृगो नियमेनावश्यं
मया निबर्हणीयो वध्यः प्रमापणं निबर्हणमित्यमरः तथाहि अरातिभंगं परमं लाभमाहुः ननु तपोविरोधिनी हिंसेत्याशंक्याह १२
श्रीराम रामविष्णु श्रीराम रामविष्णु श्रीराम रामविष्णु श्रीरामस्तु

कि॰ का॰ टी॰

धं॰ स॰ १३ कुर्विति हे तात वत्स अमार्गदायीन भवतीत्यमार्गदायी धीरं ध्याने विघ्नं अकेरमयकुर्वित्यर्थः कुतः तपार्थित्वादित्याह विजयाय तपांसि कुर्विति मुनिर्व्यासो

४ मामलंभृशमन्वशात् अनुशिष्टवान् शासेर्लुङ् ननु मुनिर्भगवान्कथमधर्ममन्वशादित्याह बलिन इति बलिनः प्रबलस्यास्य मृगस्य वधादृते वधं विना अ

न्यारादित्यादिना पंचमी अन्यथा उपायांतरेण व्रतसंरक्षणं तपोरक्षणं कर्तुं न शक्यं च हिंसापि दुष्टनिग्रहात्मिकानां धर्म इत्यर्थः १३ १३

कुरु तात तपांस्यमार्गदायी विजयायेत्यलमन्वशात्स मुनिः। बलिनश्च वधादृतेऽस्य शक्यं व्रतसंरक्षणमन्यथा न कर्तुं १३

इति तेन विचिंत्य चापनाम प्रथमं पौरुषचिह्नमाललंबे उपलब्धगुणः परस्य भेदे सचिवः शुद्ध इवाददे च बाणः १४

इतीति तेनार्जुनेन इतीत्थं विचिंत्य वितर्क्य चापनाम चापाख्यं प्रथमं पौरुषचिह्नं तस्य मुख्यायुधत्वादिति भावः आललंबे गृहीतं कर्मणि लिट् अथ प

रस्य शत्रोर्भेदे विदारणे उपजापे च उपलब्धगुणो ज्ञातशक्तिः बाणः स्फुप्राप्तमौर्वीकर्षे इति बोधः शुद्धः ऋजुः दिग्धत्वादिदोषरहितो वा नकारणभेदेन दिग्धैर्नाभि

ज्वलितैश्च सैरिति निषेधात् अन्यत्रोपधाशुद्धः बाणश्च सचिव इवाददे अत्र बाणसचिवयोः सत्त्वमात्रसाधर्म्याच्छ्रेषालंकारात्प्रकृताप्रकृतविषय इति स

र्वस्वकारः उपमेवेति केचित् १४ १४

अन्विति गुरुमहत्त्वं स्थिरत्वात्सारवत्त्वाद्विसंवादि अभंगुरं अन्यत्र प्रतिष्ठितत्वादसत्यरहितं गुणवत्सज्यमच्यौदार्यादिगुणवच्च धनुर्मित्रवानुभा
ववता निश्चितं बुद्धिमा अनुभावः प्रभावे च सत्तां च सतां निश्चय इत्यमरः धनंजयेन स्वबलव्यसने पि तपसा क्षीणत्वे पि अत्र स्वं धनंजरेव बलं तस्य क्रमेपि पी
डयमानमाकृष्यमाणमप्युध्यमानं च सन्मित्रमिवानतिं न श्रान्तो मानुकूल्यं च प्रपेदे। अलंकारस्तु एवं वित् १५ श्रीरामस्तु १५

पुलक्यः
कुलकं अनुभाववता गुरु स्थिरत्वादविसंवादि धनुर्धनंजयेन स्वबलव्यसने पि पीड्यमानं गुणवन्मित्रमिवानतिं प्रपेदे १५
प्रविकर्षनिनादभिन्नरंध्रः पदविष्टंभनिपीडितस्तदानीं अधिरोहति गां ~वं महेषौ सकलः संशयमानुरोह शैलः १६

प्रविशति तदानीं महेषौ गांडिवमर्जुनधनुरधिरोहति सति अर्जुनस्य तु गांडीवगांडीवं तु नपुंसकमित्यमरः गांडवजगान्तं त्रायामिति वप्रत्ययः प्रति
प्रकर्षणायो निनादस्तेन भिन्नरंध्रो विदलितगह्वरस्तथा पदविष्टंभेन पदाक्रमणेन निपीडितो तु भः सकलः समस्तः शैलः संशयं जिवितसंशयं आ
रुरोह प्रापेत्यर्थः अत्र शैलस्य संशयासंबंधे पि संबंधाभिधानादियमतिशयोक्तिः १६ श्रीराम श्रीरामस्तु १६

ददृशेऽइति अत्रसंधानानंतरंशिवेनास्थिरंनिश्चिलंतूर्णेचयथातथाआयेत्त आकृष्टेचापमंडलेतिष्ठतीतितथोक्तः चापमंडलमंतर्द्वीयस्थितइत्यर्थः तिसृणां
नगतिस्त्वचत्तस्त्वकृतिदीर्घप्रतिबेधः पुरांवधंसंहारंविधातुकर्तुंरचितः करलितःस्थानिविशेषस्थायित इतियावत् आत्मास्वयमेवपरेषांभयानकोभयं(
करः सोऽर्जुनः सविस्मयंददृशेदृष्टः उपमालंकारः अथापिनाकिहस्तांतमाह॰ ७ श्रीराम ७ श्रीरामस्तु॰ ७

ददृशेथसविस्मयंशिवेनास्थिरतूर्णमधनेचापमंडलस्थः रचितस्तिसृणांपुरांविधातुंवधमात्मेवभयानकःपरेषां ७
विचकर्षचसंहितेषुउच्चैश्चरणास्कंदनमिताचलेंद्रः धनुरायतभोगवासुकिज्यावदनग्रंथिविमुक्तवह्निशंभुः १८

विचकर्षेति अथशंभुश्चसंहितेषुसन्उच्चैश्चशंवरणास्कंदनेनपदविष्टंभेनतनामितः अधोनीतोअचलेंद्रोयेनसतथोक्तः सन् आयतभोगः आकृष्टका
योवासुकिरेवज्यातस्यावदनमेवग्रंथिस्तेनविमुक्तः उत्सृष्टोवह्निर्येनसत्तद्धनुर्विचकर्षइतिस्वभावोक्तिः १८ १८ विष्णुजी
राम राम राम राम राम राम राम राम राम राम राम राम राम राम राम राम राम रामरामस्तु॰

सहेति सहसंभूयत्रयमपिविधरूपं प्रयोयत्नं विधास्यतोः कथिष्यतोः अन्यत्र सहार्थमभिधेयमभिधास्यतोरित्यर्थः कृतिप्रत्ययौ सहार्थं प्रतइ
तिवचनात् भवक्षये कहेतोः शंशांरोछेदनिदानस्य भवस्य शिवस्याहितसन्नेरर्जुनस्य च मध्यं संसारेखर्वराः यस्मात्प्रत्यययोर्विधौ यत्नोसाप्रकृतिः धा
त्वादिः सत्ययः सनादिर्नियोमध्यं अनुबंधस्तत्संज्ञकोवारणः यथाभूतं भवतीत्यादौ ककारः सहवपराभवायलोपार्थमेव आपनतुस्थित्यर्थमित्यर्थः १९

सभवस्य भवदायैकहेतोः सितसप्तेश्च विधास्यतोसहार्थं रिपुरापपराभवायमध्यंप्रकृतिः प्रत्ययोरिवानुबंधः १९ ॥

अपदीपितवारिवाहवर्त्मा रवविश्रासितवारणाखार्यः निपपात जवादिषुपिनाकात्महतोभ्रारिववैद्युतः कृशानुः २०

अथेति अथरिपोर्मध्यप्रवेशानंतरं दीपितवारिवाहवर्त्माकाशं येन सः अवार्योदुर्वारस्य (रवविश्रासितवारणात् स्वघेषभापितदिग्गजात्
पिनाकात् महतोऽभ्रात् मेघात् विद्युतोयंवैद्युतः कृशानुः अग्निरिवजवाद्विः पपात आदुधाव २० राम श्रीरामकृष्ण २

कि॰ का॰ टी॰
ध॰ स॰ १२
६
6

व्रजतइति व्रजतोधावतोस्यवाणस्य बृहद्भ्यः पत्रेभ्यः पतेभ्योजन्मजेस्य सतथोक्तः कृततादर्थ्येपनिपातवेगशंकागरुडागमनवेगभ्रमोयोनस्‌ःअतएव महोरगाणांहृदयानिश्रोत्राणिचभिनत्तीतिहृदयश्रोत्रभित्‌ समुद्राद्वारादइतिसैत्रादेवव्यभिचारात्श्रोत्रशब्दस्यएवंनिपातव्यभिचारः प्रतिनादैःप्रतिध्वनि भिःमहान्संमर्दैतोनादउत्पपातउत्थितः अत्रनादस्योरगाहृदयभेदकत्वासंबंधेपिसंबंधाभिधानादतिशयोक्तिःसावतादर्थ्यवेगभ्रमोद्ध्यापितेतितयोः

थं व्रजतोस्यबृहत्पतत्रजन्माकृततादर्थ्यनिपातवेगशंकः प्रतिनादमहान्महोरगाणांहृदयश्रोत्रभिदुत्पपातनादः २१
नयनादिवशूलिनःप्रवृत्तैर्मनसोप्याशुतरंयतःपिशंगैः विदधेविलसत्तडिल्लताभैःकिरणैर्व्योमनिमार्गणस्यमाला २२

नयनादिति शूलिनोनयनात्प्रवृत्तैर्निर्गतैरिवेत्युत्प्रेक्षानेत्राग्निशिखाकल्पैरित्यर्थः विशंगैर्विलसत्तडिल्लताभैर्विद्युद्दामतुल्यैरित्युपमामनस श्चित्तादप्याशुतरंशीघ्रतरं आशुशब्दादव्ययात्तरप्‌ अतःकिमेत्तिङ्‌व्ययेत्यादिनानाम्प्रतिषेधः क्लीवेशीघ्रादिसत्वेस्यात्त्रिष्वेषांसत्वगामियदि त्यमरः यतोगच्छतः इणःशतृप्रत्ययः मार्गणस्यशरस्य कलंवमार्गणशराइत्यमरःकिरणैर्व्योमनिमार्गः उल्कारेखाकारः पंथाविदधेविरचितः इति स्वभावोक्तिरलंकारः २२

अपपन्निति एषकोबाणः पृषत्कबाणविशिखाइत्यमरः धनुषः पिनाकात् अपपन् इणः शतृप्रत्ययः शिवांतिकस्थैर्नभश्चरैरभिख्यया शोभया जिहानः शो
भमानः गच्छन्नित्यर्थः ओहाङ्गतावितिधातोः शानच् अभिख्यानामशोभयोरित्यमरः विवरे सीदंतीति विवरेसदः तैर्विवरे सद्भिरंतरालवर्त्तिभिर्नभश्चरैः सत्सूद्वेष
त्यादिना क्विप् तत्पुरुषे कृतिबहुलमित्यलुक् अयमर्थः विशन् लद्भुपोढैः प्रत्यासन्नैः वहेः कर्मणि क्तः नभश्चरैश्च युगपद्ददृशे दृष्टः इति बाणवेगोक्तिः अत्रप्रवे
शनिःक्रमणादिक्रियाविशिष्टस्य शिवांतिकादि भिन्नदेशस्य नभश्चरकर्तृकदर्शनयोगपद्यासंबंधेपि तत्संबंधोक्तिमूलातिशयोक्त्या लोकोत्तरवेगप्रतीतेरलंकारेण

अपपन्धनुषः शिवांतकस्थैर्विवरेसद्भिरभिख्यया जिहानः युगपद्ददृशे विशन्वराहं तदुपोढैश्च नभश्चरैः पृषत्कैः २३
शतमालानिभे रिपौ हुरणां घननीहार इवाभिषक्तवेगः भववीर्यतमीहितो वनसैर्जगतीम्याह इवापगा जगाहे २४

स इति स बाणस्तमालनिभे नीलाभ इत्यर्थः सुराणां रिपौ वराहे घननीहारे सांद्रतुहिन इवाविषक्तवेगोः प्रतिबद्धवेगः सन् तथा नभस्थे खेचरैर्जयेन
विष्णुतं विहुलं यथा तथाईहितः सन् अपां संबंधी वेगः अवपक्षः अपां समूहो वा आपं आपेन गच्छतीत्यापगा नदी तां गंगां जातीति गंगाहो जलचर इति वक्तव्यात्
विभाषा ग्रहइति णप्रत्ययः स इव जगतीं महीं जगतीविष्टपं महा भमिति वैजयन्ती जगाहे विवेश अंतर्हित इत्यर्थः अथार्जुनबाणप्रयोगमाह ० २४

कि का टी

धं स ८ ७

१३ सपदीति० सपदि शिववाणपातसमयस्वं प्रियरूपमाकृतिः पर्वाणि ग्रंथयोरेखा रचना श्रयस्य सः अंगुलिपक्षे रेखाः प्रसिद्धाः सितं तीक्ष्णं लोहाग्रमयः फलं
तन्नखमिवेत्युपमितसमासः शितंलोहाग्रनखं यस्य सः कुपितस्यांतकस्य मृत्योर्या भर्जुनस्यांगुलिस्तर्जनी तस्याः श्रीरिव श्रीर्यस्य स कपिध्वजेषुरर्जुनवाणः
प्राणभृतो व्यथयन् भीषयन् भीषयमाणः खमाकाशमाससाद उपमालंकारः २५ रामकृष्ण श्रीरामरामकृष्ण २५

सपदि प्रियरूपपर्वरेखः सितलोहाग्रनखः खमाससाद कुपितांतकतर्जनांगुलिश्रीर्व्यथयन् प्राणभृतः कपिध्वजेषुः २५
परमस्त्रपरिग्रहोरुतेजःस्फुरदुल्काकृतिविक्षिपन्वनेषु सजवेन पतन्परःशतानां पततां व्रातस्वरं वितेने २६

परमेति परमास्त्रपरिग्रहेण दिव्यास्त्राधिष्ठानेनउरुमहत्तत्स्फुरदुल्काकृति उल्कावद्दीप्यमानमित्यर्थः तेजोवनेषु विक्षिपन् विकिरन् जवेन पतन्
न्धावन् स वाणः शतान्परे परःशतास्तेषां शताधिकसंख्यानामित्यर्थः परःशताद्यास्ते येषां परा संख्या शतादिके त्यमरः पंचमीति योगविभागा
त्समासः राजदंतादिषु परमित्युपसर्जनस्य शतशब्दस्य परनिपातः अतः समहे इव व्रतं वं चितेने० २६ २६ श्रीरामरामरामरामराम

नू° अविभावितेति· अतिरंहसा अतिवेगेन अविभाविते अलक्षितो निःक्रमोऽङ्गाद्धीवान्निः सर्वं प्रयाणं गमनं च यस्य स तथा शमितायामः संक्षिप्तदैर्घ्य इव स्थित इत्युत्प्रेक्षा पृ°
वेगगुणाभिभूताद्दैर्घ्यगुणाभावोत्प्रेक्षा सशरः सहनु सह वा चित्तवृत्तेरिति शेषः चित्तवृत्तेः पूर्वतरं नु प्रागेव वा उभयप्राप्तिलक्षितैवमिति विशेषः अथवा अपतित्वानुलक्ष्य इति
शेषः लक्ष्यभेदं चकार अत्रानुप्रासवेगगुणेनाभिभूताद्गाण्डीवचित्रशत्रिसहपानपूर्वकतंत्रं पातनपातोऽभावोत्प्रेक्षोक्तेः सशरोत्तरोत्कर्षेणावेगातिशयव्यंजिकाऽत्यलंकारेण

अविभावितनिष्क्रमप्रयाणः शमितायाम इवातिरंहसा सः सहपूर्वतरंनुचित्तवृत्तेरपतित्वानुचकारलक्ष्यभेदं २७
स वृषध्वजसायकावभिन्नंजयहेतुःप्रतिकायमेषणीयं लघुसाधयितुंशरःप्रसेहे विधिनेवार्थमुदीरितंप्रयत्नः २८

स इति जयहेतुः स शरो वृषध्वजसायकावभिन्नं शिवशरविद्धं एषणीयं वेद्धुमिति शेषः इषेरिच्छार्थादनीयर्प्रत्ययः प्रतिकायं प्रतिपक्षं विधिना विधिवा-
क्येनोदीरितं फलसाधनतया प्रतिपादितमर्थं यागादिकं प्रयत्नः पुरुषव्यापार इव लघु अक्लेशेन साधयितुं प्रसेहे शशाक· २८ श्रीरामकृष्णा·

॥ कि॥ ॥ का॥ ॥ टी॥
धं॥ ॥ स॥ ॥ १३॥
॥ ८॥

अविवेकं तरानभिज्ञत्वं वृथाश्रमाविति ॥ फलप्रयत्नः ॥ तावर्थं धनमिव अस्थाना विनियोगहेतुत्वादनयोर्धनहानिकरत्वमिति भावः ॥ क्षयोनुपचयः लोभोऽप्रदानं तौ संश्रितानामुपाजीविनामनुरागमिव ॥ अकिंकरे स्वामिन्यनुरागस्यानवस्थानादिति भावः ॥ अनयो दुर्नीतिः प्रमादोऽनवधानता तौ विजिगीषुमिव बंधुम् अयि रक्षन्नयासिद्धेरिति भावः विशिखौ शिवार्जुनबाणौ तं वराहं अवसादं करणशैथिल्यं विनिन्यतुर्नीतवंतौ ॥ नयतिर्द्विकर्मकः मालोपमेयम् ॥ २९ ॥

४ वृषाः

अविवेकं श्रमाविवार्थं क्षयलोभाविव संश्रितानुरागं ॥ विजिगीषुमिवानयप्रमादाववसादं विशिखौ विनिन्यतुस्तं ॥ २९ ॥
अथ दीर्घतरं तमः प्रवेक्ष्यन् सहसा रुग्णरयः ससंभ्रमेण ॥ निपतन्तमिवोष्णरश्मिमुर्व्यां वलयीभूततरुं धरां च मेने ॥ ३० ॥
स गतः क्षितिमुष्णशोणितार्द्रः खुरदंष्ट्राग्रनिपातदारिताश्मा ॥ असुभिः क्षणमीक्षितेन्द्रसूनुर्विहितामर्षगुरुध्वनिर्निरासे ॥ ३१ ॥ रुग्ण

अथेति अथ दीर्घतरं तमो दीर्घनिद्रां प्रवेक्ष्यन् मरिष्यन्नित्यर्थः सहसा रुग्णरयो भग्नवेगः स वराहः संभ्रमेण भ्रांत्या संभ्रमो भ्रांतिहावयोरिति विश्वः उष्णरश्मिं सूर्यं उर्व्यां निपतन्तमिव मेने वलयीभूततरुं धरां च भ्रमन्तीं मेने इत्यर्थः स्वभावोक्तिरियं ३० सगत इति क्षितिं गतः क्षितौ पतितः उष्णेन प्रत्यग्रत्वात् शोणितेन आर्द्रः खुरदंष्ट्राग्राणां निपातेन दारिता अश्मानो येन सः खुरदंष्ट्राग्रनिपातदारिताश्मा पाषाणः किंच क्षणमीक्षितेन्द्रसूनुः स्वार्थविघातकत्वादिति भावः अत एव विहितः अमर्षगुरुः क्रोधाधिकः ध्वनिः क्रंदनं येन स तथोक्तः स वराहः असुभिः प्राणैर्निरासे निरस्तः त्यक्त इत्यर्थः अस्यतेः कर्मणि लिट् इयं स्वभावोक्तिः ३१ श्रीकृष्ण रामस्त

स्फुटेति अथ वराहपातानंतरं पार्थः प्राज्यशरः प्रभूतशरः शरत्पौस्यार्थीः प्रभूतं प्रचुरं प्राज्यमित्यमरः स्फुटपौरुषं व्यक्तविक्रमं तं वराहभेदिनं शरं जिघृक्षु
र्गृहीतुमिच्छुः ग्रहेस्सन्तंतात् ढः प्रत्ययः आपपात आदुधाव कृतज्ञजनपार्श्वग्रहणमनुलोमाद्दित्यर्थः नचचैतदयुक्तमकर्त्तारस्य किमित्यचैवादरः तत्राह नेति कृतवेदि
नां कृतावदानः कृतकर्मा अवदानं कर्मवृत्तमित्यमरः यथा प्रियतामेति यथाकरिष्यन् उपचरिष्यन् प्रियतां नेति कृतकरिष्यमाणयोः कृतं बलीय इति भावः अपयु
क्तमर्थमेनाह ३२ उपकार इत्यादि ३३ सइति ३४ ३४ ३४

क्षमः

स्फुटपौरुषमापपात पार्थस्तमथ प्राज्यशरं शरं जिघृक्षुः नतथाकृतवेदिनां करिष्यन्प्रियतामेति यथा कृतावदानः ३२ युग्मम्
उपकार इवासति प्रयुक्तः स्थितिमप्राप्य मृगेण गतः प्रणाशं कृतशक्तिरधोमुखो गुरुत्वाज्जनितव्रीड इवात्मपौरुषेण ३३
सपुरुस्सरता विचिंत्य तेन स्वरुचं कीर्तिमिवोत्तमां दधानः अनुयुक्त इव स्ववार्त्तमुच्चैः परिरेभे नु भृशं विलोचनाभ्याम् ३४

उपकारइति स बाणः असति नीचे प्रयुक्तः उपकार इव मृगेण स्थितिमप्राप्य प्रणाशमदर्शनमिव गतः अप्युपमानयाकृतशक्तिः कृतपोदयः गुरुत्वाल्लोहप्रभरत्वान्महत्वा
त्वादुन्मुखो नम्रमुखः कृतस्य आत्मपौरुषेण जनितव्रीड इव स्थित इत्युत्प्रेक्षा ३३ सइति उत्तमां स्वरुचं कीर्तिमिव दधानः इत्युत्प्रेक्षा विचिंत्य पुरस्सरतामिति
मस्य पुरस्सरतेनार्जुनेन उच्चैः स्ववार्त्तं स्वपाटवं वार्त्तं पाटवमारोग्ये भव्यं स्यात् मतामयमिति यादवः अनुयुक्तः पृष्ट इव स्थित इत्युत्प्रेक्षया अन्वर्थतया प्रतीयमानस्य
र्थः प्रश्नोऽनुयोगः पृच्छा चेत्यमरः स बाणो विलोचनाभ्यां भृशं परिरेभे नु आलिलिंगे नु किमित्युत्प्रेक्षा तेनात्मादरो लक्ष्यत इत्यर्थः ३४ ३४ कृपा।

कि. का. टी.
ध. स. १२
२९

णाविशिष्टं च ॥ महावराहमिव स्थितमत्र साधर्म्यादियमुपमानश्लेषः ॥ यावन्मात्रसाधर्म्येणानस्माविधानादिति रहस्यं ॥४०॥ हरिदिति
पुनश्च ॥ हरिन्मणिश्यामं ॥ मरकतश्यामलमुदग्रविग्रहमुदारमूर्तिं देहिनः ॥ सत्त्वान्परिभूय प्रकाशमानं ॥ जलमेवादर्शस्तस्मिन्नंशुमालि
नं ॥ सूर्यमिव मनुष्यभावे ॥ मनुष्यरूपे स्थितं ॥ पुरातनं ॥ पुरुषं ॥ पौवरीवननिवासिना ॥ नारायणसहचरो ॥ नरो नाम धर्मिन्यर्थः ॥४१॥

गुर्वीति॥ गुरुभिः क्रियारंभाणां फलैः अलंकृतं॥ सफलकर्मारंभमित्यर्थः॥ जगत्प्रमाथिनो अगाढ्हिजयिनः॥ प्रतापस्य तेजसो गतिं स्थानं॥ अतोस्य बहूनां भे
कलत्यत्वं युज्यतइति संदर्भाभिप्रायः॥ पूर्वोक्तविशेषणविशिष्टमनीलवाजिनमर्जुनं गणास्तपात्यये तोयघना तोयभरितावार्षिका इत्यर्थः॥ वनामेघा
महाचलमिव समासेदुर्वायुरित्यर्थः॥ ३३॥ यथास्वमिति॥ पुरा पूर्वं स्वं स्वमनतिक्रम्य यथास्वमहमहमेवैनं जेष्यामीत्याशंसिताः॥ कांक्षिताः॥ कपिध्वजविक्र

गुरुक्रियारंभफलैरलंकृतं गतिं प्रतापस्य जगत्प्रमाथिनः॥ गणाः समासेदुरनीलवाजिनं महाचलं तोयघनाघ
नात्यये॥ ३३॥ यथास्वमाशंसितविक्रमाः पुरा मुनिप्रभाक्षततेजसः परे॥ ययुः क्षणादप्रतिपत्तिमूढतां महानुभाव
प्रतिहंति पौरुषं॥ ३४॥ ततः प्रजह्रे सममेव तत्र तैरपेक्षितान्योन्यबलोपपत्तिभिः॥ महोदयानामपि संघवृत्तितां
॥ सहायसाध्याः प्रदिशंति सिद्ध

मायैस्ते परे शत्रवः॥ क्षणान्मुनिप्रभावान्हततेजसो॥ हतप्रभावाः संतः॥ अप्रतिपत्तिमूढतां॥ म
हाधनतां॥ ययुः॥ तथाहि॥ महानुभावः॥ पौरुषं॥ पुरुषप्रयत्नं हंति॥ ३४॥ ततइति॥ ततस्तत्रैकैकस्याशक्तौ अपेक्षिताः अन्योन्यबलोपपत्ति॥ रन्योन्यस
हकृतवदंभोयैस्तैर्गणैरर्जुने॥ क्रियाधारत्वात्सप्तमी सममेव युगपदेव॥ प्रजह्रे॥ प्रहृतं॥ भावेलिट्॥ तथाहि सहायसाध्याः॥ सिद्धयः॥ कार्यसिद्धयः॥
महोदयानां॥ महानुभावानामपि संघवृत्तितां॥ तेषां भावः॥ तत्त्वतां॥ संघवृत्तीनां॥ संभूयकारितां॥ प्रदिशंति॥ अतोगणानामपि संभूयकारित्वं नदो

॥ ३ ॥ पं

॥ ३४ ॥ पं

॥कि॰॥टी॰॥का॰॥

॥टं॥ स॰॥१४॥

॥११॥

37

किरातेति॥ उरुभिश्चापैर्नोदिताः॥ क्षिप्ताः॥ उपात्तरंहसः॥ प्राप्तवेगाः॥ प्रवृत्तपत्रध्वनयः॥ संजातरवाः॥ शिलीमुखाः॥ बाणाः॥ महावनादुन्मनसः॥ क्वापि गंतुमुत्सुकाः॥ तथा उक्तविशेषणविशिष्टाः॥ खगा इव॥ किरातसैन्यात्समं तत उत्पेतुः॥ ४५॥ गभीरेति॥ गभीररंध्रेषु गभीरगह्वरेषु॥ महीभृतः॥ सानुषु येः प्रतिस्वनास्तैर्भृशमुन्नमितेनोन्नापितेन॥ जवादुपेयुषा धनुषो॥ निनादेन॥ दिशो विभिद्यमाना॥ विदीर्यमाणा इव दध्वुः॥

किरातसैन्यादुरुचापनोदिताः समं समुत्पेतुरुपात्तरंहसः॥ महावनादुन्मनसः खगा इव प्रवृत्तपत्रध्वनयः शिलीमुखाः॥ ४५॥ गभीररंध्रेषु भृशं महीभृतः प्रतिस्वनैरुन्नमितेन सानुषु॥ धनुर्निनादेन जवादुपेयुषा विभिद्यमाना इव दध्वनुर्दिशः॥ ४६॥ विधूनयंती गहनानि भूरुहां तिरोहितोपांतनभोदिगंतरा॥ महीयसी वृष्टिरिवानिलेरिता रवं वितेने गणमार्गणावलिः॥ ४७॥

ध्वनुः॥ ४६॥ विधूननेति॥ भूरुहां गहनानिव॥ वनानि॥ विधूनयं तीकंपयंती॥ तिरोहितान्युपांतानि॥ प्रांतानि नभोंतरिक्षं॥ दिगंतराणि च यया सा॥ गणमार्गणावलिः॥ प्रथमशरसंहतिरनिलेन ईरिता॥ प्रेरिता॥ महीयसी वृष्टिरिव रवं वितेने॥ ४७॥ त्रयीमिति॥ ऋतूनां त्रयी॥ षण्णां साम्॥ कालाध्वनोरत्यंतसंयोगे द्वितीया

अनिलाशिनो ॥ वायुभक्षकस्य ॥ कृशस्येति अर्थः ॥ तथापि रणाय प्रहृष्यतः ॥ रणं कर्तुमुत्सहमानस्य ॥ क्रियार्थेत्यादिना चतुर्थी
जिष्णोरर्जुनस्य वपुषि ॥ पोषमुपचयं ॥ प्रयाति ॥ गच्छति सति ॥ शिथिलेन त्वाग्रिति शेषः ॥ वर्म्मणा विदुषेव ॥ अनंतरकरणीयं जा
नता इवेत्युत्प्रेक्षा ॥ सत्वरं घनत्वं दृढत्वमीये प्राप्तं ॥ अन्यथानुपयोगादिति भावः ॥ इणः कर्मणि लिट् ॥ ४८ ॥ पतत्स्विति ॥

अयीमृतत्वामनिलाशिनः सतः प्रयाति पोषं वपुषि प्रहृष्यतः ॥ रणाय जिष्णोर्विदुषेव सत्वरं घनत्व
मीये शिथिलेन वर्म्मणा ॥ ४८ ॥ पतत्सु शस्त्रेषु वितत्य रोदसी समंततस्तस्य धनुर्दुधुक्षुणः सरोष
मुल्केव पपात भीषणा बलेषु दृष्टिर्विनिपातशंसिनी ॥ ४९ ॥ [illegible]

शस्त्रैः ॥ रोदसी द्यावापृथिव्यौ ॥ समंततो वितत्य ॥ व्याप्य ॥ पतत्सु ॥ सत्सु ॥ धनुर्दुधूषणः ॥ कंपितुमिच्छतः ॥ आस्फालयत इत्यर्थः ॥ धू
नोतेः सन्नंता च्छतृप्रत्ययः ॥ स्वरतिसूतिसूयतिधूञूदितो वेति ॥ विकल्पादिडभावः ॥ तस्यार्जुनस्य ॥ संबंधिनी भीषयत इति भीषणा नंद्यादित्वाल्युः ॥

दिशइति॥क्षयकालः॥कल्पांतकालः॥सइवदारुणोरौद्रः॥मुनिरर्जुनः॥इषुभिर्दिशः समूहन्निव॥एकत्रसमाहरन्निव॥अन्यथातासांपा
दर्शनंनस्यादितिभावः॥रवेः॥प्रभांविक्षिपन्निव॥अधःक्षिपन्निव॥अन्यथासाकंपंनक्षपेतइतिभावः॥तथाअनिलं॥व्याकु
लयन्॥इषुगेलांतराले॥आघूर्णयन्निव॥तस्यतथागतिविघातादितिभावः॥सशैलांक्षितिं॥चलयन्निव॥कंपयन्निव॥तथासं

दिशःसमूहन्निवविक्षिपन्निवप्रभांरवेराकुलयन्निवानिलं॥मुनिश्चचालक्षयकालदारुणःक्षितिं
सशैलांचलयन्निवेषुभिः॥५॥विमुक्तमाशंसितशत्रुनिर्जयैरनेकमेकावसरंवनेचरैः॥मुनिर्जघा
॥नायुधमंतराशरैःक्रियाफलंकालइवा तिपातितः॥६॥

लोभादितिभावः॥चचाल॥सर्वत्रइवशब्दउत्प्रेक्षायां॥५॥विमुक्तमिति॥
आशंसितः॥आकांक्षितः॥शत्रुनिर्जयोयैस्तैः॥अहमहमितिकथयाशत्रुं॥विजिगीषद्भिरित्यर्थः॥वनेचरैरेकावसरंसम
कालं॥अनंतसंयोगेद्वितीया॥विमुक्तमनेकमायुधः॥जातावेकवचनं॥सोर्जुनः॥क्रियाफलमतिपातितोगतिक्रांतः॥कालइव॥अनी

नकालस्यकर्मणोनिःफलत्वादितिभावः॥अंत
॥रामधेशरैर्निजघान॥५॥

गतैरिति ॥ पांडुनंदनः ॥ परेषामविभावनीयतां लघुप्रयोगादन्यत्र गूढप्रयोगाच्चाज्ञायमानतामप्रकाशनां गतैः ॥ विपदमनर्थं निवारयद्भिः ॥
विदूरगैर्दूरलक्षणगैः ॥ परमंडलप्रविष्टैश्च बृहत्फलैरायतनाग्रैर्महालाभैश्च ॥ फलं बाणाग्रलाभयोरिति शाश्वतः ॥ शरैरुपायैः सामा
दिभिरिव भृशमुपचितः ॥ प्रवृद्धो ॥ बभूव ॥ अत्र शरमात्रसाधर्म्यात् ॥ प्रकृताप्रकृतश्लेषः ॥ उपमेति केचित् ॥ ५२ ॥ दिवइति ॥ शराः दि

गतैः परेषामभिभाविनीयतां निवारयद्भिर्विपदं विदूरगैः ॥ भृशं बभूवोपचितो बृहत्फलैः शरैरुपायैरिव
पांडुनंदनः ॥ ५२ ॥ दिवः पृथिव्याः ककुभां नु मंडलात्पतंति बिंबादुत तिग्मतेजसः ॥ सकृद्विकृष्टादथ कार्मु
कान्मुनेः शराः शरीरादिति ते ऽभिमेनिरे ॥ ५३ ॥ ॥ येनरिताः पृथिव्याः ॥ भूगोलाद्वा ककुभां मंडलान्नु दिशां मंडलाद्वा ।
उत तिग्मतेजसो बिंबाद्वा ॥ अथवा सकृद्विकृष्टात्कार्मुकान्मुनेः ॥ शरीराद्वा पतंतीति तेगणाः ॥ अभिमेनिरे ॥ अन्यथा कथमयं विश्वा
नर्थ्यापि शरसंभाविन इति भावः ॥ अत्र सर्वतः शरसंपात । दर्शनात् संभावनया पृथिव्यादीनामन्यतमस्योपादानत्वोत्प्रेक्षा ॥ साच
प्रतीयमाना व्यंजकाप्रयोगात् नु शब्दाय दस्तु संशये ॥ ५३ ॥ रामजी ॥

गरणेति॥मर्मविदारणेरपि मर्मस्थानान्येवविदारयद्भिरित्यर्थः॥गणाधिपानां॥परासुतां॥मरणमविधायनिर्गतैस्तेषाममर्त्यत्वादि
तिभावः॥तस्यमुनेः॥पत्रिभिःशरैः॥कृतापराधैरिवस्वामिनः॥कार्य्याकारणात्सापराधैरिवस्थितैरित्यर्थः॥अधोमुखैः॥सद्भिर्जवात्॥हि
मवान्॥अजीयत॥अतिवक्रमे॥प्रविष्टइत्यर्थः॥लज्जितस्यकश्चिन्नयनमुचितमितिभावः॥५४॥द्विषामिति॥प्रथमे॥प्रथमंसज्जाः॥द्वि

गणाधिपानामविधायनिर्गतैःपरासुतांमर्मविदारणैरपि॥जवादतीयेहिमवानधोमुखैःकृतापराधै
रिवतस्यमार्गणैः॥५४॥द्विषांक्षतीर्याःप्रथमेशिलीमुखाःविभिद्यदेहावरणानिचक्रिरे॥नतासुपेतेवि
शिखैःपुनर्मुनेररुंतुदत्वंमहतांह्यगोचरं॥५५॥

त्यर्थः॥शिलीमुखाः॥मुनिशराः॥द्विषांदेहावरणानि॥वर्माणि
विभिद्यया॥क्षतीः॥प्रहारान्॥चाक्रिरे॥तासुक्षतीषु॥पुनः॥पश्चात्प्रयुक्तैर्मुनिविशिखैः॥नयेनेपिष्टपेषणे॥नदोषापादइति
भावः॥तथाहि॥अरुंतुदत्वं॥पीडनं॥पीडनंसतामगोचरोहिसंतः॥पीडितंपीडांनकुर्वंतीत्यर्थः॥नहन्याद्व्यसनप्राप्तं नार्त्तं ना
तिपरिक्षतंइतिनिषेधस्मरणादितिभावः॥अरुर्व्रणं॥तुदतीति॥अरुंतुदः॥व्रणोस्त्रियामीर्ममरुरित्यमरः॥विध्वरुषोस्तुदइतिखश्प्रत्ययः॥

समुज्झितेति ॥ पार्थेनो ऽशनयो ॥ यावद्राति: ॥ यावद्वधारणाऽव्ययीभावः ॥ यावद्राति ॥ समुज्झिता ॥ अरातिसमसंख्यया मुक्ताः ॥ मुनिचापात्सह संभृ
यैव निर्यती निष्क्रामन्ती ॥ नाटकृतस्य कोशात्म्यमिति भावः ॥ एते प्रातरिडीघृ ॥ मुनिवारणसंहतिरुमापतेश्चमूं हिमांशोः ॥ प्रभा पंकजावलिमिव संको
चेतिनाय ॥ ५६ ॥ अजिह्म इति ॥ आजिह्मस्वरूपनागम्या वाचके ॥ अन्यत्र तु ॥ जिह्मस्यानम्र हन्तो न भवतीत्याजिह्म मोजिष्ठमोजस्विनं सारव

समुज्झिता यावदराति निर्यती सहैव चापान्मुनिवारणसंहतिः ॥ प्रभा हिमांशोरिव पंकजावलिं निनाय संकोच
मुमापतिश्चमूं ॥ ५६ ॥ अजिह्ममोजिष्ठममोघमक्लमं क्रियासु बह्वीषु पृथग्नियोजितं ॥ प्रसेहिरे सादयि
तुं न सादिनः शरौघमुत्साहमिवास्य विद्विषः ॥ ५७ ॥ नम्रं नेजिह्मं चोभयत्रापि ॥ ओजस्विशब्दादिष्ठं तादिष्टेति ॥ वि
न्मतोर्लुक् ॥ इति लुक् ॥ टिलोपश्च ॥ अमोघमवध्यमक्लमं निरंतरव्यापारेप्यश्रांतं ॥ बह्वीषु क्रियासु छेदनभेदनपातनादि
कर्मसु पृथक्भेदेन नियोजनं ॥ कर्मानुगुणरूपेण विनियुक्तमित्यर्थः ॥ सादिनः ॥ विकर्षिताः ॥ विद्विषः ॥ साधयितुं प्रतिक
र्तुं न प्रसेहिरे ॥ न शेकुः ॥ तस्योत्साहवदेव शरवर्षं दुर्धर्षमभूदिति भावः ॥ ५७ ॥ ॥ रामजी ॥ ॥ रामजी ॥

॥ कि॰ ॥ का॰ ॥ टी॰ ॥
॥ ग्रं॰ ॥ स॰ ॥ १४ ॥
॥ ९४ ॥
८०

शिवेति ॥ अनेकदेशगा नानादेशस्थाः ॥ शिवध्वजिन्यास्समासः ॥ उग्रेषव एव मयूखाः ॥ तेषां माला अस्यास्तीति ॥ तमुग्रेषु ॥ मयूखमा-
लिनं ॥ ग्रीष्मादित्यादिनिः ॥ एकदेशस्थमेकत्रैवास्थितं ॥ तं मुनिं ॥ अर्कं ॥ प्रजा इव युगपत्प्रतियोधस्य ॥ अव्ययं विभक्तीत्यादिना यु-
धार्थे वीप्सायामव्ययीभावः ॥ अतः स्फुरन्तं ॥ निदध्युः ॥ ददृशुः ॥ यथैकोऽर्क एकत्रैव स्थितोऽपि नानादेशस्थानामपि ॥ प्रतिपुरुषमि-

शिवध्वजिन्यः प्रतियोधमग्रतः स्फुरन्तमुग्रेषुमयूखमालिनं ॥ तमेकदेशस्थमनेकदेशगा निदध्युरर्कं युग-
पत्प्रजा इव ॥ ५८ ॥ मुनेः शरौघेण तदुग्ररंहसा बलं प्रकोपादिव विष्वगायता ॥ विधूनितं भ्रान्तिमियाय संगि-
नीं महानिलेनेव निदाघजं रजः ॥ ५९ ॥

वाग्रे वर्त्तन इति ॥ युगपत्प्रतीयते ॥ नद्धं ह्यार्गववर्षी ॥ पुनरपि प्रतियोद्धं नयेव प्रत्यभा-
दिति भावः ॥ ५८ ॥ मुनेरिति ॥ प्रकोपादमर्षादिव विष्वक् ॥ समन्तादायता गच्छता ॥ उग्ररंहसातिवेगेन ॥ मुनेः ॥ शरौघेण उक्तविशेषेण
न महानिलेन वान्यया ॥ निदाघजं ॥ ग्रीष्मोत्थं रजः इव ॥ विधूनितं ॥ आहतं ॥ तद्बलं ॥ प्रथमसैन्यं ॥ संगिनीमनुसंबंधिनी ॥ मतिछिन्नामि-
त्यावत् ॥ भ्रान्तिमनवस्थानमियाय ॥ ५९ ॥

अथ त्रिभिर्विशेषकमाह ॥ तपश्रीति ॥ हन्ता इति ॥ ६१ ॥ जयेनेति ॥ ६२ ॥ विशेषकं ॥ तपश्रीति ॥ एष मुनिस्तपोबलेन भूयसीरुदृश्यास्तनूरात्मनः ॥ शा-
रीराणि विधाय स्वच्छाः इष्टान्निरस्यति ॥ स्विनास्तिपति वा ॥ किं चास्य मुने मायया विहितं ॥ प्रतिहतं ॥ नत्त्वं स्वकीयमेवायुधं ॥ प्रतीपं ॥ प्रतिकूलं ॥
आगत्य ॥ पन्थाप्नोत्यर्थः ॥ नोस्माकं वा निर्हिंति किन्तु ॥ नासिनि प्रहरणेनास्त्रदिव्येण निपातः ॥ विय हीनवीर्यस्मरणान् ॥ शेषेषष्ठीक

तपोबलेनैव विधाय भूयसीस्तनूरुदृश्याः स्विदृष्टान्निरस्यति ॥ अमुष्य मायया विहितं निहंति नः प्रतीपमागत्य किमु
स्वमायुधं ॥ ६ ॥ हन्ता गुणैरस्य भयेन वा मुने तिरोहिताः स्विन्न हरंति देवताः ॥ कथं त्वमी संततमस्य सायकाः भवं-
त्यनेके जलधेरिवोर्मयः ॥ ६३ ॥ ॥ मणिपक्षी ॥ शेषाविवत्तायां तुहितीया ॥ ६ ॥ हन्ता इति ॥ यद्यस्य मुनेः गुणैर्हन्ताः ॥ आकृष्य वा भ-
येन दरेण वा भयाद्विभ्यतो वेत्यर्थः ॥ देवतास्तिरोहिताः ॥ सन्तः ॥ प्रहरंति ॥ स्विन्न ॥ पन्न ॥ कुतः ॥ अन्यथा अस्य मुने रमी सायकाः ॥ जलधे-
रूर्मय इव ॥ कथं तु ॥ संततमनेके च संख्याना भवंति ॥ एतन्नोक्तान्यतम पत्तासंभवेन भवतीत्यर्थः ॥ ६३ ॥ ॥ यक्षीजी सहायें ॥

जयेनेति॥ यद्यामुनिरयंजयेन। रणाग्रगुरुमाहिरमेकश्चिदस्माज्जित्वापिगुरुमुपसंहरेत्किं॥ अथवाचराचरायजंगमस्थावरायस्वस्ति
भवेदपितेमंभवेन्कश्चित्॥ नमःस्वस्तीत्यादिनाचतुर्थी॥ स्वस्त्याशीः॥ तेमपुरापोदाविन्समरः॥ इत्युक्तरीत्या। प्रतर्काकुलितानाना
संशयव्याप्ता॥ पताकिनी॥ शिवसेना॥ नृपसूनुमार्गणैरर्जुनशरैः॥ कीर्णासंनीततताप॥५२॥ अमर्षिणेति॥ अमर्षिणा॥ क्रोधवता

जयेनकच्चिद्विरमेदयंरणाद्भवेदपिस्वस्तिचराचरायवा॥ ततापकीर्णानृपसूनुमार्गणैरितिप्रतर्काकुलिता
पताकिनी॥५२॥ अमर्षिणाकृत्यमिवक्षमाश्रयं मदोद्धतेनेवहितंप्रियंवचः॥ बलीयसातद्विधिनेवपौरुषंव
लंनिरस्तंनरराजजिष्णुना॥५३॥

क्षमासाध्यं॥ कृत्यमिवयथा॥ मदोद्धतेन॥ पुंसा॥ हितं॥ वचः॥ निरस्तं॥ निरस्कृतमिव॥ यथाबलीयसो॥ विधिना॥ दैवेन॥ निरस्तं॥ पौ
रुषमिव॥ बलिष्टदैव॥ प्रतिहत॥ पुरुष॥ व्यापारस्य॥ निःफलत्वादितिभावः॥ तथाजिष्णुनार्जुनेन॥ निरस्तं॥ तिरस्कृतं॥ बलं॥ कि
रातसैन्यं॥ नरराज॥ मल्लोपमा॥५३॥ ॥रामजी॥सहायं॥
रा

॥कि॰का॰टी॰॥
॥ष्टं॰स॰१४॥
॥१६॥

प्रतिदिशमिति॥ प्लवगाधिपलक्ष्मणा अर्जुनेन विशिखानां संहत्या सुतापिता मूर्त्तिर्विग्रहो येषां तैः॥ शिवबलैः॥ रविकरग्लपितैः॥ सूर्यकिरणशोषितैर्वारिभिर्जलैरिव॥ प्रतिदिशं परिमंडलता दधे॥ प्रतिदिशं मंडलाकारेण स्थितमित्यर्थः॥ उपमेयं॥ ६४॥ प्रविततेति॥ पांडुसूनौ॥ प्रविततानि विस्तृतानि यानि शरजालानि तैः॥ छन्नं विश्वांतरालं येन तस्मिन्॥ अत एवाविर्मंडलं आविर्भूतमिति॥ ततो॥ भूतार्थस्यानुप्रवे॥

प्रतिदिशं प्लवगाधिपलक्ष्मणा विशिखसंहतितापितमूर्त्तिभिः॥ रविकरग्लपितैरिव वारिभिः शिवबलैः परिमंडलता दधे॥ ६४॥ प्रविततशरजालच्छन्नविश्वांतराले विधुवति धनुराविर्मंडलं पांडुसूनौ॥ कथमपि जयलक्ष्मीर्भीतभीता विहातुं विषमनयनसेनापक्षपातं विषेहे॥ ६५॥ इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके

शार्दूलस्याव्ययस्या प्रयोगः॥ धनुर्विधुवति सति॥ भीतभीता इव भीतप्रकारा इव जयलक्ष्मीर्विषमनयनसेनापक्षपातं शिवसैन्यानुरागं॥ कथमपि केनापि प्रकारेण॥ महता कष्टेन वा न हातुं॥ विषेहे॥ शशाक॥ मालिनी वृत्तम्॥ ६५॥ इति श्रीमहोपाध्याय कोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयव्याख्यायां घंटापथसमाख्यायां चतुर्दशः सर्गः॥ १४॥ सं॰१९२८ जे॰प्र॰१५

॥ किरातस्य पंचदशमः सर्गः ॥ पत्रसंख्या ॥ २४ ॥ द्वादशः ॥

॥ १५ ॥

ॐश्रीगणेशायनमः ॥ अथेति ॥ अथानंतरं ॥ तत्ररणे ॥ भूतानि ॥ सर्वप्राणिनो वृत्रंहतवान् ॥ वृत्रहा इंद्रः ॥ ब्रह्मभ्रूणवृत्रेषुक्विप् ॥ तस्यापत्यंपुमान् वार्त्रघ्निरर्जुनः ॥
तस्यापत्यमित्यण्प्रत्ययः ॥ तस्यशरेभ्यः ॥ तत्रसुर्विभ्युः ॥ धातूनामुत्रसामितिविकल्पादेत्वाभ्यासलोपाभावः ॥ मावमूभ्यश्च इषवोऽस्यंते एभिरितीष्वासाः ॥ अकर्त्त
रिचकारकेसंज्ञायामितिकरणेघञ् ॥ परित्यक्तामहांतः इष्वासाश्चापायपासात्यक्त्वापृथेत्यर्थः ॥ दिशोभेजे ॥ पलायांचक्रेरित्यर्थः ॥ अत्रभूतत्राससेनापलाय

अथभूतानिवार्त्रघ्नशरेभ्यस्तत्रतत्रसुः ॥ भेजेदिशःपरित्यक्तमहेष्वासाचसाचमूः ॥ १ ॥ अपश्यद्भिरिवेशा
नंरणान्निवृत्तैर्गणैः ॥ मुह्यत्येवहिकृच्छ्रेषु वशंतुद्वेषरातिषु ॥ २ ॥ संभ्रमज्वलितंमनः ॥ द्वितीयपाठ

नयोः समुच्चयकथनात् भिन्नविषयाक्रियासमुच्चयोलंकारः ॥ गुणक्रियायोगपद्यंतसमुच्चयइतिसामान्यलक्षणं ॥ तस्ययमकेनसंसृष्टिः ॥ १ ॥
अपश्यद्भिरिति ॥ गणैः प्रथमैरीशानंस्वामिनं ॥ शिवंपुरोवर्त्तिनमपीतिभावः ॥ अपश्यद्भिरिववरणान्निवृत्तेनिवृत्तं ॥ भावेलिट् ॥ तथाहि ॥ कृच्छ्रेष्वापत्सु
संभ्रमेणसाध्वसेनज्वलितं ॥ संतप्तं ॥ संभ्रमःसाध्वसेपिस्यादितिविश्वः ॥ मनः समुह्यत्येव ॥ अतःपुरोवर्त्तिनोप्यदर्शनमुपपद्यत इत्यर्थः ॥ २ ॥

खंडिनेति॥ खंडिना ध्वस्ता आसंसा जया संसायस्यां नयानेषां गणानां संबंधिन्या नयाहृष्टयेत्यर्थः॥ पराङ्मुखनयारागविमुखेन पलायते नेत्यर्थः॥ केतौध्वजे
कृत आरोपित उच्चैरुन्नतोवानरोयेन तंनरं पुरुषं॥ ध्वजमित्यर्थः॥ कृपाद्या॥ आविवेश॥ आविशत्॥ नदीयांदुर्दशां दृष्ट्वा॥ कृपाविष्टोभूदित्यर्थः॥ यमकालंकारः॥३॥
ननु शत्रुषु कथं करुणेत्यत्राह॥ आस्यामिति॥ आस्यां॥ यत्नं॥ आलंम॥ आस्याचालंवनास्यानयत्ना॥ पेतेषु कम्पने इतिविश्वः॥ वशंनीतेषु॥ हृष्टेषु अ

खंडिनासंधयातिषांपराङ्मुखनयानया॥ आविवेशकृपाकेतौकृतोच्चैर्वानरंनरं॥३॥ आस्यामालंव्यनीतेषुवं
शंत्युद्ग्रसितेषु॥ आविवेशकृपाकेतौकृतोच्चैर्वानरंनरं॥४॥ समासिःसामस्तःसासोः येयायेयाययायय:॥

रातिषु विषये॥ अनुकंपया महता॥ माहात्म्यं॥ महानुभावत्वं॥ अक्तं॥ स्फुटमायातिनः॥ स्वपौरुषनिर्जितेषु॥ अरातिषु करुणाभूषणंमहतांभवतीति
भावः॥४॥ एकाक्षरपादः॥ समासैरिति॥ असिनामहः॥ वर्त्तमानःसामिः॥ सखड्गः॥ असन्मुचंतिप्रेरयंतिइति असुसवः॥ वाणाः॥ असु प्रेरणेधातोः॥
संपदादित्वात् क्विप्॥ असुसृभिःसहवर्त्ततइतिसासुसृः॥ सवाणाः॥ असंतेशराः अनेनेत्यासो धनुः॥ अकर्त्तरिचकारकेसंज्ञायामिति घञ्॥ आसेनसहव

न्तत्र इति समासः॥ स चापः॥ सर्वत्र ते न सह इति तुल्ययोग इति बहुव्रीहिः॥ येयांश्च अयेयाश्च येयायेयाः॥ तेषां ह्यानामा यंगजस्वर्णादिलाभं यानि प्राप्नोति॥ ये
यायेयायय॥ येयायेयायय श्चासौ॥ अयश्च अयः शुभावहो विधिरित्यमरः॥ तमयं दैवं यानीत्ययः॥ उभयत्राप्यानोनुपसर्ग इति कः॥ ललतिविलसतीति ल
लः॥ ललविलासे पचाद्यच्॥ अलोलो चपलः॥ शाशिनः ईशाः शिवस्य शिम्भुः स्कन्दः॥ तं शृणोति हिनस्तीति॥ शशी शाशिशुशी॥ क्विप्॥ शशान्॥ शुनगनिं कुर्वन्॥ शशा

ललौलीलांलल्लोलोलः शशीशशिशुशीःशशान्॥ ५॥ त्रासजि त्रान्पतश्रेतान्मंदमेवान्वियायसः॥ नातिपीडयितुंभग्ना
ने निछंतिहिमहोजसः॥ ६॥ अथाग्रेहसतासाचिस्थितेनस्थिरकीर्तिना॥ सेनान्यातेजगादेरुः किंचिदुपस्तचेतसा॥ ७॥

शुनगतावितिधातोः शानच्प्रत्ययः॥ सोऽर्जुनो लीलां शोभां॥ ललौ प्राप॥ लाआदाने॥ एकाक्षरपादः॥ ५॥ त्रासेति॥ सोऽर्जुनो त्रासजिह्मं भयकुटिलं यथा तथा
पतो गच्छतः॥ पलायमानानित्यर्थः॥ एतान् गणान्॥ मंदमेवान्वियाय॥ अनुजगाम च॥ तथा हि॥ महौजसो महानुभावः॥ भग्नानतिपीडयितुं नेछंति
हि॥ ६॥ निरोक्ष्यः॥ अथेति॥ अयसहता भंगदर्शनात् स्मयमानेन॥ अग्रेसाचिस्थितेन॥ नाग्निवारणार्थं॥ तिर्यग्गाग्रेन स्थिरकीर्तिना॥ स्वयमभंगादि
तिभावः॥ किंचिदुपस्तचेतसा॥ स्वकीयगणभंगादीषत् खिन्नचित्तेन सेनान्या स्कंदेन॥ पार्वतीनंदनः स्कंदः सेनानीरग्निभूर्गुह इत्यमरः॥ नेगणाजगादि

अथैकविंशतिभिः श्लोकैः स्कंद्वाक्यमेवाह ॥ कांचीयमकं ॥ माविहासिष्टेति ॥ रंतव्यं रमणीयं ॥ क्रीडा ॥ बहुलगृहणाभावेतव्यप्रत्ययः ॥ संयत् ॥ युद्धं ॥ समुदायः स्त्रियां संयत्समित्या
दि समिद्युधरित्यमरः ॥ समरे रंतव्यसंयत्तो येषां ते समरंतव्यसंयतः ॥ तुल्यक्रीडासंगरा इति येषां संबोधनं ॥ समरं माविहासिष्ट ॥ मात्यज ॥ न हाते माङि लुङ् ॥ मध्यमस्य बहुवचनं ॥ तु सा
असुराणां गणा यैस्तत्संभवद्भिरिति शेषः ॥ अगणैरिव ॥ गणेभ्योऽन्यैरिव ॥ किमर्थं यशः पराकृतं त्यक्तं ॥ नैव युक्तमित्यर्थः ॥ ८ ॥ विवस्वदिति ॥ विवस्वदंशुसंश्लेषेण किरणसंप

माविहासिष्ट समरं समरंतव्यसंयतः ॥ तत्त्वं सुरासुरगणैर्गणैरिव किं यशः ॥ ८ ॥ विवस्वदंशुसंश्लेषाद्विगुणीकृततेज
सः ॥ अमी वो मोघमुद्गीर्णा हसंतीव महासयः ॥ ९ ॥ वने वने वनसदां मार्गं मार्गमुपेयुषां ॥ बाणैर्बाणैः समासक्तं शंके शंके

र्केणाद्विगुणीकृतानि तेजांसि येषां ते न तथोक्ताः ॥ मोघं व्यर्थं ॥ उद्गीर्णा उद्यताः ॥ गुरु उद्यमे इति धातोः कर्मणि क्तः ॥ वो युष्माकममी ॥ न शाम्यति ॥ १० ॥
महासयो खड्गा हसंतीवेत्युत्प्रेक्षा ॥ किं पलायमानानां खड्गैरिति हासः ॥ ९ ॥ वन इति ॥ वनेसदां वनचराणां ॥ अथ वने रुतके वने मार्गं मृगसंबंधिनं मार्गं पंथानं
उपेयुषां पलायमानानामित्यर्थः ॥ युष्माकमिति शेषः ॥ बाणो ध्वनिरेषामस्तीति बाणैः ध्वनिमद्भिः ॥ बाणाः शब्दे इति धातोर्घञ् ॥ ततः अर्शआद्यच्प्रत्ययः ॥ यमक
त्वात् बवयोरभेदः ॥ उक्तं च ॥ ननयोर्भजयोस्तावत् डलयोर्बवयोरपि ॥ नमयोर्नणयोश्चांते सविसर्गाविसर्गयोः ॥ सविंदुकाविंदुकयोः स्यादभेदेन कल्पनमि

पातिनोति ॥ पातितंभ्रंशितं ॥ उत्तुंगमुन्नतं ॥ माहात्म्यमनुभावो येस्तैः ॥ संहृत ॥ आयता कीर्त्तिर्यैस्तैः ॥ पुम्भिरिति शेषः ॥ कापुरुषा ॥ अपदं हन्तुं न का विदपीत्यर्थः ॥ आह
त्रिपुद्धान्निर्हन्निः सैव साहसं कृतं ॥ अतः पापारन्यत्र किंचित्फलमस्तीति भावः ॥ नत्दुक्तं मनुना ॥ पत्तुभीतिः पराहन्तः संग्रामे हन्यते परैः ॥ भर्तुर्यद्दुःकृतं किं
चित्तन्सर्वं प्रतिपद्यते ॥ यच्चास्य सुकृतं किंचिदमुत्रार्थमुपाहृतं ॥ भर्त्तातत्सर्वमादत्ते परावृत्तहतस्य त्विति ॥ ११ ॥ गोमूत्रिका ॥ नेति ॥ किंच अयं ॥ असुरो है
त्योनागो वा पन्नगो गजश्च न धरसंस्थः ॥ पर्वताकारः ॥ अहार्य धरपर्वता इत्यमरः ॥ संस्थो व्यवस्था ॥ श्रेणीधि समाश्याकारमनुष्ठितिवैजयंती ॥ रात्तसो नाकें

पातिनो तुंगमाहात्म्यैः संहृतायतकीर्त्तिभिः ॥ उर्वीं कापुपदं हंतुं कृतं नो माहवि साहसं ॥ ११ ॥ नासुरोयं न वा नागो धरसंस्थो
न राक्षसः ॥ नासुखोयं न वाभोगो धरणिस्थो हि राक्षसः ॥ १२ ॥

तु ॥ अयं ॥ सुखयतीति सुखः ॥ सुखसाध्य इत्यर्थः ॥ यत्त्तनोरपीति विग्रहः ॥ धरणीस्थो भूतलवर्ती राजसो ॥ रजो गुण प्रधानो नापुरुषो हि ॥ काश्चित्मा रु
षइत्यर्थः ॥ स्युः पुमांसः ॥ पंचजनाः ॥ पुरुषः ॥ पुरुषा नरा इत्यमरः ॥ अतोन पलायनमुचितमिति भावः ॥ गोमूत्रिका बंधः ॥ वर्णानामेकरूपत्वं यद्येकांतर
मर्द्धयोः ॥ गोमूत्रिकेति तत्प्राहुर्दुष्करं तद्विदो विदुरिति लक्षणात् षोडशकोष्ठद्वये ऽर्द्धद्वयं क्रमेण विलिख्ये कांतर विनिमयेन वाचने श्लोकानि

मंदमिति ॥ एष मुनिः ॥ घृणया ॥ कृपया ॥ इषुलतां घृणया मुनि शरवामिव मंदमस्यन् ॥ क्षिपन् ॥ वायुषा पशूनिव ॥ आगतावज्ञं यथा तथा ॥ जघनेषु प्रणुदति
चोदयति ॥ परं कृष्टमस्तीति भावः ॥ १३ ॥ एकाक्षरः ॥ नेति ॥ पदछेदस्तावत् ॥ न ॥ ना ॥ उन्ननुन्नः ॥ नुन्नोनः ॥ अना ॥ ना ॥ नानाननाः ॥ ननु ॥ नुन्नः ॥ अनुन्नः ॥ ननुन्ने
नः ॥ ना ॥ अनेनाः ॥ नुन्ननुन्ननुत् ॥ हे नानाननाः ॥ नानाविधास्याः ॥ ऊनेन नातिनिकृष्टेन नुन्नो विद्धः ऊननुन्नोऽयः सना पुरुषो न नयानुन्नो वि

१५ मू मन्दसन्निषुलतां घृणया मुनिषवः ॥ प्रणुदत्यागतावज्ञं जघनेषु पशूनिव ॥ १३ ॥ ननोननुन्नो नुन्नोनो नानानाननानानुः ॥ नुन्नोनुन्नोननुन्नेनो नानेनानुन्ननुन्ननुत् ॥ १४ ॥ अयमेकक्षेननः ॥
द्धः ॥ उन्नो येन स नुन्नोनः ॥ ना पुरुषः ॥ अनानानु अपुरु
षः ॥ खलु ॥ ऊनाङ्गीनः ॥ पलायमानस्तु किं व क्रमिति भावः ॥ किंच नुन्नः ॥ इनः स्वामी यस्य स नुन्नेनः ॥ सोऽन भवतीति ॥ ननुन्नेनः ॥ नञर्थस्य
नञ् शब्दस्य सुप्सुपेति समासः ॥ स नुन्नोप्यनुन्नः ॥ स्वयं चानुन्नस्वामिकत्वादनुन्नाएवेति भावः ॥ नुन्ननुन्नान् ॥ नुदतीति नुन्ननुन्ननुत् ॥ अति
पीडितेऽपि पीडकः ॥ अनेना निर्दोषो न भवति ॥ नाङ्गनाऽनिपरीतनमितिनिषेधाद्दित्यर्थः ॥ अयं चेनाऽदृश इति ॥ न पलायितमिति भावः ॥ अयमे
कव्यंजनः ॥ अंत्यलकारेन दोषवहः ॥ नोऽत्यवर्णास्तु भेदकर

किरा० ९१

वरमिति॥कृताः पूर्वमुत्पादिता ध्वस्ताः॥पश्चान्नष्टास्ते कृतध्वस्ताः॥पूर्वकालेत्यादिना समासः॥कृतध्वस्ताः गुणा यस्य तस्मात्पुंसः॥अत्यंतमनिशयेन निर्गुणः
पुमान्॥वरं मनाक्प्रियः॥वरं क्लीवे मनाक्प्रियमिति केशवः॥न याहि प्रकृत्या॥स्वभावेन॥अमणिर्मणिरहितो लंकारः॥श्रेयान्॥श्रुतोपलः श्रात्॥रत्नेन
श्रेयान्॥रूपलः प्रस्तरे रत्न इति विम्वः॥पला यितु सुरादसुर एव वरमिति भावः॥नाम विरोधयोः --- वकरणा दृष्टांतालंकारः॥१५॥स्पंदनाः इति॥स्पं
दते प्रद्रवंतीति स्पंदनाः॥नवनाः॥स्पंदनाः रथाः॥नो संति॥इति नंद्यादित्वाल्ल्युट् प्रत्ययः॥चतुरंगच्छंतीति चतुरगाः॥अश्वा नो संति सुरेभाः

वरं कृतध्वस्तगुणाद् त्यंतमगुणः पुमान्॥प्रकृत्या ह्यमणिः श्रेयान्नालंकारश्च्युतोपलः॥१५॥स्यंदना नो चतुरगाः सुरेभा वा।
विपन्नयः॥स्यंदना नो चतुरगाः सुरेभा वा विपत्नयः॥१६॥~~अनुलोम प्रतिलोम पादः॥ येत्रसौ ककुजे पोले लेसैजे वकुत्सात्रये~~
शोभनं बृहणगा सुरेभाः सुरगजाश्च नो संति अविपत्नयो विपन्नि रहिता विपत्नयो विशिष्टाः पदातयो नो संति॥अत्र तानभेतध्य मितिभावः॥अत्र सर्वं निराद्य
पानांश्चिं विदिशो जेनेतुं जेशो स्वि विकिंतस्या ७
गता विशेषणानां चोद्देश्योद्देशिभूतानां यथासंख्यं संबंधानुक्रयाद्यथासंख्यालंकारो यमकेन संसृष्टिः॥१६॥ राम॥ राम॥ रामः
रामराम राम श्रीरामराम राम॥श्रीरामरामरामरामरामरामरामरामश्री॥ श्रीरामराम रामरामरा॥ श्रीराम॥ श्रीरामस्तु:

भवद्भिरिति ॥ अधुना ॥ अरातिभिः ॥ परिहारिता निरस्याजिता निर्योहृषाणि येस्तैर्भवद्भिरर्कनिष्पीतैरर्कसंशोषितैः ॥ ह्रदैरिव दुरुत्तरः पंकश्च पंकोऽदुः
कीर्त्तिः प्राप्तः ॥ १७ वेत्रेति ॥ वेत्राणि वंशाः फलिन्यो वा काधाः ॥ वर्वरश्च कुजाः कृताः ॥ यस्मिन्वेत्रशाककुजे दुःप्रवेश इत्यर्थः ॥ शाकवर्वरव
ई का इत्यमरः ॥ अलेशेनाल्पेन ॥ नाप्येजे कंपते इति ॥ अलेशो जे ॥ अत्यंतकंपन इत्यर्थः ॥ एजत्कैः कंपनेपचाद्यच ॥ न कुकोऽनादरोऽत्र इति अकुकः

समुद्गयमकं

भवद्भिरधुनाराति परिहापितपौरुषैः ॥ ह्रदैरिवार्कनिष्पीतैः प्राप्तः पंको दुरुत्सहः ॥ १७ ॥ अतिलोमप्र
त्तिलोमपादः ॥ वेत्रशाककुजे शैले लेशैजेकुकशात्रवे ॥ यात किं विदिशो जेतुं तुंजेशोऽटिविकिंतया ॥ १८ ॥

ग्रहणासमर्थः ॥ शात्रवो यस्मिन् अकुकशात्रवे वुक आदाने पचाद्यच ॥ शैले केषांभावः ॥ किंता कुत्सितता तया ॥ उपलक्षिता ॥ हंतः ॥ कुत्सा प्रश्न
वितर्के षु हेतो किं शब्द ई प्यत इति शास्वतः ॥ विदिशो जेतुं यातनपत्तनकिं ॥ यातेसंप्रश्ने लोट् मध्यमपुरुष बहुवचनं ॥ दिविसर्गेपि तुंजे से ॥ इति ते यां संबोधनं
तुंजेतीति तुंजाः हेत्याः तुजि हिंसायांपचाद्यच ॥ तेष्वईशास्त इति ईशः शक्राः ॥ क्षिप ॥ स्वेसर्गेपि अप्सुर यो यिनां पुष्पाकं ॥ अत्रत्तु दुस्यलेङ्गु इशत्रोपलायनें किमिति

॥ कि॰ ॥ का॰ ॥ टी॰ ॥
॥ धं॰ ॥ स॰ ॥ ५ ॥
॥ ५ ॥

५८

अयमिति ॥ अयमीशः स्वामी शिवः कैव्यं निःपौरुषं आपन्नान् आपन्नान् ॥ तथा अरातिनाहृष्टहृष्टान् पलायमानानित्यर्थः ॥ कोपु आन् च्युताचारान् सवलि तप्रतान् दारान् कलत्राणीव ॥ दाराः पुंभूम्नि चाहताः इत्यमरः ॥ निगोपितुं गोप्तुं ॥ इडित्वा दिड्विकल्पः ॥ हरहेयं भर्त्रेव स्वमहिम्ना पुष्पहेतोः संवरितुमिच्छति आ नः कुत्तो वो मुख्याकं साध्वसमित्यर्थः ॥ १९ ॥ नन्विति ॥ नन्वित्यामंत्रणेहाइत्याहुः नेहेव्यस्तो समस्तो वा दूरस्तसंबोधनार्थयोः होहो चैव विधौ ज्ञेयो मं
बह्माह्वानयोरपि इति विश्वः ॥ मर्षं

अयं वः क्लैब्यमापन्नान् दृष्टपृष्ठान् अरातिना ॥ कोकुतीशश्च्युताचारान् दारानिव निगोपितुं ॥ १९ ॥ अनुलोमप्र
तिलोमपादः ॥ ननु होमथनाराधो धोरानाथमहेनुनु ॥ ननयदाननवरभीमामाभीदावत्दायन ॥ २० ॥ इति

नौतिमथना ॥ कर्त्तरिल्युट् ॥ राधयंतीतिराधवः राधसामर्थ्ये क्विप् ॥ धोराः क्रूराः ॥ आयमह्यंतीतिनाहृशिमहात्मकमेण्युपदेक्विप् ॥ नयंते नीहं मीतिनवाः पचा
द्यच् दायंतीतिदाता ॥ शुद्धादेपे कर्त्तरि क्तः ॥ वदंतीतिवदाः ऽवक्तारः ॥ पचाद्यच् ॥ तेषां द्वंद्वं तयादानवदाः भीमाः ॥ भयंकराः ॥ माभीरभीः माशब्दस्यार्थे स्यसुप्सु
पेतिसमासः ॥ तां ददातीति माभीदाः ॥ अभयप्रदाः ॥ एवंविधाः स्वमितिशेषः ॥ वाऽस्त्वेदेचवयोरभेदः ॥ ननु तयतनुप्रच्छायां किं न गुप्यते त्यर्थः ॥ काकुरा

किमिति अपत्तोऽवधीरितो देवत्वमानुष्यकयोः परिग्रहः स्वीकारो यैस्तैः अतिदेवमानुषैरित्यर्थः मनुष्याणां भावो मानुष्यकं योपधाद्गुरूपोत्तमाद्वुञ् ज्वलि तान्यगुणैरुज्ज्वलिता सदृशगुणैः अन्योविभिन्नासदृशावितिवैजयन्ती ईदृशैर्भवद्भिरितिशेषः तेजसि प्रतापे स्थिता अपेकशरणागुर्वी महती मानिता अहंत्वाभिमानिता किमितित्यक्तानि निर्लज्जैः अत्याप्यत इतिभावः २१

किंत्यक्ष्याम्पात्तदेवत्वमानुष्यकपरिग्रहैः ॥ ज्वलितान्यगुणैर्गुर्वी स्थितानो तेजसि मानिता ॥२१॥

निशितासिरतोऽभीकोन्येजनेमाररणारुचा ॥ सारतो न विरोधीनः स्वभावो भरवानुतः ॥२२॥

निशितेति। हेऽअमरगणाः ॥ मरणरहिताः ॥ निशितासिरतस्तीक्ष्ण ॥ खड्गरतः ॥ अभीको निर्भीकः ॥ रुचा तेजसा ॥ उपलक्षितः ॥ सुष्ठु आभासत इति स्वाभासो रमणीयः ॥ पचाद्यच् ॥ उत तात्पर्ये ॥ भरवान् ॥ रणभरसहिष्णुरित्यर्थः ॥ उतात्पर्यविकल्पयोरिति विश्वः ॥ ईदृशो नोऽस्माकं विरोधी श त्रुः ॥ सारतो बलेन नो न न्येजतेन ॥ कंपतेन चलतीत्यर्थः ॥ एजृ कंपने लट् ॥ अतो भवद्भिरपि स्थातव्यमेव न चलितव्यमिति भावः ॥२२॥

॥कि॰ का॰ टी॰॥
॥ध॰ स॰ २५॥
॥९६॥

नन्वयं न चलतीति कथं विज्ञायतेऽत आह । नात्विति तनुं हृद्गमोतीति तनुवारं वर्म कर्म्मणि परा तेन न वृभातिभास इति ननु कारभसः पवाघवृ भास्वा
न्तेजस्वी चारुणा अविनते नीम्नते नोरसा ऽपलाहितिरगैः तः एवं विधोप्यधीरः भीतः सन् रसितेन शब्दितेनैवाप्नाति यसतीति रसितनाशी
तस्मिन् एवंसैव विश्वधारा प्रहारिरगीत्यर्थः आभीत्तेगारगितिः जने युद्धे युद्धमायोधनं जन्यमित्यमरः कोरमते क्रीडतिति न कोपीत्यर्थः
निर्भयसंचारादेवास्य निश्चलत्वं निश्चीयत इत्यर्थः सर्वश्लोकस्यायं प्रातिलोमः २३ अथ पंचभिः कुलिकमाह । विभिन्नेत्यादि २४ एवेति

ननुवारभसोभास्वानंधीरोविनतोरसा। वरुणारमतेजन्येकोभीरोरसितारिशनी ॥२३॥ प्रतिलोमचक्रं कुलकं ॥ वि
भिन्नपातितनाश्वीयनिरुद्धरथवर्त्मनि ॥ हतद्विपनगष्ठ्यूतरुधिरांबुनदाकुले ॥२४॥

॥सर्वतोभद्रः॥ प्रत्यनेति २५ ॥ ससत्वे
ति २७ ॥ अर्द्धभ्रमः ॥ आसुर इति २८ ॥ विभिन्नेति ॥ नत्र महाहवं ॥ वाशिनाष्ट्र ॥ विभिन्ना विदारिता ॥ अत एव पातिता भुवि अश्वीयाश्च सर्वकालेति समा
सः ॥ तैरश्वीयैरयसम्हैर्निरुद्धानि रथानां वर्त्मानि ॥ यत्र तस्मिन् ॥ नयोक्ते ॥ वृंदं त्वश्वीयमाश्ववदित्यमरः ॥ केशाश्वाभ्यां यज्छावन्यतरस्यामिति छः
प्रत्ययः ॥ हतद्विपापवागाः ॥ शैलाः ॥ शैलवृक्षौ नगावगावित्यमरः ॥ तैर्निष्ठ्यूतानि ॥ उज्झितानि यानि रुधिराणि ॥ ष्ठिवने कर्मणि क्तः ॥ ष्ठोः शूद् तु नासि

केचेनि जडाः देशाः ॥ तानि रुधिराणि एव अंबूनि तेषां
नद्यः प्रवाहैः राकुले ॥२४॥

५७

देवेति ॥ पुनश्च देवान् ॥ आकायन्त्याह्वयन्तीति देवाकानी ॥ तस्मिन् देवाकानिनि ॥ कनतेर्णिन्तात्‌ णिनिः प्रत्ययः ॥ कावादे ॥ कुत्सितो वादो आ
भाषणं यस्मिन् कुशब्दस्य कादेशः ॥ वाहिकपालघुरश्येन पर्यायेण भारोद्वहनं वाहः ॥ वहेः पर्यायेधात्वर्थनिर्देशो वा तुल्य वक्तव्यः ॥ सुष्ठु अश्वकान्
परान् ॥ आजिहीते ॥ अभियुक्ते इति वाहिकास्त्वस्वकाहास्तस्मिन् वाहिकास्त्वस्वकाहि योद्धधर्मा युद्धे उपचर्यन्ते ॥ आहाङ् गतौ विति धातोर्विप्रत्ययः ॥ सोमपाशब्द
वत् ॥ पाकेयावायादश्चार्थे कं मस्तके ॥ आकिरतीति काकाराः ॥ मदस्रा विराः ॥ किरतेराङ्पूर्वात्कर्मण्यण् ॥ काकाराइभभराः ॥ गजघटाः ॥ यत्र तस्मिन् काकारेभभरे ॥ हे को

देवाकानिनि कावादे वाहिकास्त्वस्ववाहिका काकारेभभरे काकानिस्वभव्य अभस्वनि ॥ २५ ॥ घनन्नशव
चित्रस्तत्तुरगात्तिन्नसारथ्यो मारुतास्वर्गतृणीररविक्लृष्टहत सादिनि ॥ २६ ॥ सर्वतोभद्रः ॥

काः ॥ काकाइव काकागर्ध्याइति लत्तरणयानेषामामं विरां ॥ निःस्वा निरुत्साहाः भव्याः ॥ सोत्साहास्तान् ॥ उभयान् ॥ अभयंति ॥ संहरावनीति निस्वा
भव्यभाः ॥ आतोऽनुपसर्गे कः ॥ नैर्भवास्तिभासस्तेयस्तास्मिन् ॥ निस्वभव्यव्यभस्वनि ॥ अन्येभ्योऽपि दृश्यंत इति क्वनिप् ॥ इति सर्वतोभद्रं ॥ २५ ॥ घनन्नेति ॥ घनन्न
शवेभ्यो नृत्यत्कबंधेभ्यो ॥ विचत्रस्ते ॥ तुभितैः ॥ तुरगैरातित्रावथ्यनासारथ्यो यत्र तस्मिन् ॥ मारुतेन ॥ आप्रेरितैस्तूणीरैर्विक्लृष्टाः ॥ शब्दायमानाः ॥ हताः ॥
मारिता ॥ सादिनोऽश्वारोहा यत्र तस्मिन् ॥ २६ ॥

समस्येति॥ समसत्वानां॥ सत्ववतां रतिदे रागप्रदे नित्यंसदर्शाणांसभयानां॥ अमर्षनाशिनि क्रोधहारिणि त्वरया उत्साहेन॥ अधिकसंतोविकसंतोनाद
यत्र तस्मिन्॥ रमयंतीति रमकाः तद्भावोरमकत्वं रणकर्मणापरंजकत्वं॥ आकर्षति अपनुदति॥ अर्द्धश्रमके॥ २७॥ आसुरइति॥ एवंविधेआसुरे॥ असु
रसंबंधिनि लोकवित्रासविधायिनि॥ लोकभयंकरे॥ महाहवे॥ महायुद्धे॥ युष्माभिरुन्नतिं॥ नीतं॥ इहयुद्धे॥ संग्रामे पौरुषं निरस्तं॥ नाशितम्॥ २८॥ कुल

समसत्वरतिदे नित्यं सदरामर्षनाशिनी॥ त्वराधिकसमसन्नादे रमकत्वमकर्षति॥ २७॥ आसुरे लोकवित्रासविधायिनि महा
हवे॥ युष्माभिरुन्नतिं नीतं निरस्तमिह पौरुषं॥ २८॥ निरोध्य॥ इति शासति सेनान्यां गच्छत्सु तान नेकधा॥ निषिध्य हसता किंचि
त्तस्य तेनांधकारिणा॥ २९॥ मुनीषुदहनातन्वान्लज्जया विनिहन्यतः॥ शिवः प्रह्लादयामास तान्निषेधहिमांबुना॥ ३०॥

कं॥ २८॥ इतीति॥ इतीत्थं सेनान्यां स्कंदे शासत्याज्ञापयति॥ अनेकधागच्छत्सुः॥ पलायमानान्॥ गणान्॥ निषिध्य॥ निवार्य्य॥ अंधकारिणाहरेण॥
किंचिद्धसता॥ तस्य॥ स्यिन्तं॥ भावेलिट्॥ निरोध्यं॥ मुनीषिति॥ मुनेरिषुरेवदहनः॥ तेनातन्वान्॥ तथा लज्जया विनिहन्यतः॥ निवर्त्तयिष्यमानान्॥ ह
न्यः स्यसनोरितिविकल्पात्परस्मैपदं॥ तान्॥ गणान्॥ शिवः॥ निषेधोमाभैष्ट॥ मापलायध्वमिति॥ निवारणवचनं॥ सएवहिमांबुशीतोदकं तेन प्रह्लादया

हूनाइति । हूनाः सत्रस्ताः । त्वादिभ्यइतिनिष्ठानत्वं । अरेवलाहूना । अनवलाः । पंचमीसमासः । निरेभाः निःशब्दाः । कुतोयतोभीतास्त्रस्ताः । यतःपिनैः । शरैरभीताः । अभि-
व्याप्ताः । सुगकर्मणिक्तः । गेगणात्त्रस्तेणशंकरं । अभयवचनेनसुकरं शंकरं शिवं वहुमेने । वहितिक्रियाविशेषणं ॥ ३१ ॥ महेष्विति । दुरुत्तरे । दुस्तरे । शत्रोः संवंधिनीमहेषुजलधौ
महनिवाणसागरे । वर्त्तमाना पताकिनी सेना ईशानं शिवं परतीरमिव । पारावारे पारावारीणमरुः । प्राप्य अशाश्वासं प्राणितिस्म ॥ ३२ ॥ सइति । सशिवः । रणोपेतां । रणादपाहृतां

हूनाक्षेरिवलाहूनानिरेभावहुमेनिरे । भीताशिवतराभीताः शंकरंतत्रशंकरं ॥ ३१ ॥ महेषुजलधौशत्रोर्वर्त्तमानादुरुत्तरे । प्राप्यपारमिवे
शानंमाशश्वासपताकिनी ॥ ३२ ॥ सवभाररणायेतांचमंपश्चादवस्थितां ॥ पुरःसर्पर्दिपाहृतांछायामिवमहातनुः ॥ ३३ ॥ मुंचतीशेशरा
। जिष्णौपिनाकस्वनपूरितः ॥ दधानध्वनयन्नाशाःस्फुटन्निवधराधरः ॥ ३४ ॥ ॥ ३४ ॥ श्रीरामकृष्णाय०

पश्चात्पृष्ठभागे । अवस्थितां । चमूं । पुरोग्रेस्थितः सर्प्पः । पुरःसर्प्पः । रणोपमानमेनत् । तस्मादपाहृतां । पराहृतां छायां महातरुरिव वभार । छायांनरुरिवात्मेक-
शरणांतांनसुमुचेत्यर्थः ॥ ३३ ॥ मुंचतीति । ईशेहरेकर्त्तरि । जिष्णौ । अर्जुने विषये । शरान् मुंचतिसति । पिनाकस्यस्वनोध्वनिस्तेनपूरितोधराधरः । इंद्रकी-
लः स्फुटन्निव विदार्य्यमाणइवेत्युत्प्रेक्षा । आशादिशोध्वनयन् । दधान ॥ ३५ ॥ ० । रामजी । ० । रामजी । ० । रामजी ।

॥ कि॰ का॰ टी॰ ॥
॥ सं॰ ॥ स॰ ॥ १५ ॥
॥ ८ ॥
५९

नमिति ॥ भीमं नन्वयोः ॥ हरपांडवयोः युद्धं ॥ गणाः प्रमथाः ॥ चित्रसंस्थाः ॥ चित्राकाराः ॥ अनेकप्रकाराः अचलाः शैला इवा तथा चित्रे ॥ आलेख्ये संस्थाः स्थिता येषां ते चित्रसं
स्थाः ॥ चित्रलिखिता इव ॥ अचलाः अप्रवर्ण्यवन्त्यानिश्चलाः ॥ संतो विस्मयेन ददृशुः ॥ २५ ॥ परीति ॥ शिक्षालाघवलीलया ॥ अभ्यासपाटवातिशयेन हेतुना
परिमोहयमाणेन ॥ आमोहयता ॥ अणावकर्मकाच्चित्तवत्कर्तृकादिति परस्मैपदे प्राप्ते ॥ नपादम्येत्यादिना ॥ प्रतिषेधादात्मनेपदं ॥ शानन् ॥ कृत्यचेष्टा वि

तद्गणा ददृशुर्भीमं चित्रसंस्था इवाचलाः ॥ विस्मयेन तयोर्युद्धं चित्रसंस्था इवाचलः ॥ २५ ॥ परिमोहयमाणेन शिक्षालाघव
लीलया ॥ जैष्णवी विशिखश्रेणी परिजह्रे पिनाकिना ॥ २६ ॥ अवद्यन्पत्रिणः शंभोः सायकैरवसायकैः ॥ पांडवः परिचक्राम
शिक्षया रणशिक्षया ॥ २७ ॥ चारचंचुश्चिरारेचीचंचच्चीररुचा रुचः ॥ चचार रुचिरश्चारु चारैराचारचंचुरः ॥ २८ ॥

भाषणत्वं ॥ पिनाकिना ॥ हरेण ॥ जिष्णोरर्जुनस्येयं जैष्णवी ॥ विशिखश्रेणिः ॥ परिजह्रे निरस्ता ॥ २६ ॥ अवद्यन्निति ॥ पांडवः ॥ अवसायकैरवसानकैः ॥ स्यतेरर्पणा
ण्वुल्प्रत्ययः ॥ सायकैः ॥ बाणैः ॥ शंभोः पतत्रिणस्तच्छरान् ॥ अवद्यन् ॥ खंडयन् ॥ द्यतेः शतृप्रत्ययः ॥ ओतः श्यनीत्योकारलोपः ॥ शिक्षया शक्त्या ॥ अभवितुमिच्छया
उत्साहेनेत्यर्थः ॥ अपरणशिक्षया रणाभ्यासेन परिचक्राम ॥ उत्साहेन पुराणाभ्यां चचारेत्यर्थः ॥ २७ ॥ चारेति ॥ अचरः ॥ वारैर्गतिविशेषैः ॥ चित्रोत्तानः ॥ चारचंचुः ॥

नेनविन्नः श्मश्रुचुचरणपोऽइतिचुंचुप्रश्नपक्षः ॥ विरं बहुश्रारेचपरीक्रीकरोतिशत्रूनितिविचारेची ॥ चंचंतः चलः वीरस्यबल्कस्यरुचाप्रभया ॥ चंच वीररुचारोचन इ
ति रुचः ॥ शराभमानाः ॥ इशुपन्नाश्रीकिरःकः ॥ रुचिरः सुंदरः ॥ चंचूर्यमेनेभृशंचरतीतिचंचुरः ॥ वरयतेर्यङ्लुगंतात् ॥ पचाद्यच् ॥ वरफलाञ्श्रितिनुमागमः ॥ यङोऽचिचेति
यङोलुक् ॥ आचारस्य युद्धसमयस्य चंचुरोभृशमाचरिता समुनिः श्वारूपयातपा ॥ चापेश्चक्रादिवधेश्चचार ॥ चारः क्रियानुहन्तेस्याद्भनौ चं धापसमर्प्ययो
रितिविश्वः ॥ ध्वतरोयम् ॥ ३८ ॥ स्फुरदिति ॥ समुनिः ॥ स्फुरतीतिपिशंगमौर्वीयस्यतत्तथोक्तं ॥ नयन्तश्चेतिकप्रत्ययः ॥ बृहद्धनुर्धुनानः ॥ कंपयन् ॥ उल्कायाः अ

स्फुरत्पिशंगमौर्वीकं धुनानः स बृहद्धनुः ॥ धृतोल्कानलयोगेन तुल्यमंशुमता बभौ ॥ ३९ ॥ पार्थबाणाः पशुपते
रावव्रुर्विशिखावलिं ॥ पयोमुच इवारंध्राः सावित्रीमंशुसंहतिम् ॥ ४० ॥ शरवृष्टिं विधूयोर्वीमुदस्तां सव्यसाचिना ॥
रुरोध मार्गणैर्मार्गं तपनस्य त्रिलोचनः ॥ ४१ ॥

नलस्तेनधृतोयोगोयेनतेनांशुमता ॥ अर्केणास्त्रस्पृशा तुल्यं बभौ उपमा ॥ ३९ ॥
पार्थेति ॥ पार्थबाणाः पशुपतेर्विशिखावलिं ॥ सवितुरियं सावित्रीमंशुसंहतिं ॥ अरंध्राः नीरंध्राः पयोमुच इवाववुः ॥ तिरोदधुः ॥ ४० ॥ त्रिलोचनः स
व्येन सचते समवैतीति सव्यसाचिना ॥ अर्जुनेनोदस्तां क्षिप्तां ऊर्वीं महतीं शरवृष्टिं ॥ मार्गणैः शरैः विधुप तिरस्य तपनस्य मार्गं रुरोध आववे ॥ ४१ ॥

नेनेति॥नेनशिवेनभीमाः॥भयंकराः॥भियोमार्जनंनिरसनंनद्वेवफलंप्रयोजनंयेषांनानि॥आननानिअग्राणियेषांतेभीमार्जुनफलाननाः॥शि
खिवाधरजवाससो मयूरपत्रिण इत्यर्थः॥विशिखाः॥बाणाः॥अनुकंप्यकृपांकृत्वैवनव्यानेनिरे॥इतिनाकिंत्वनुकंप्यैवेत्यर्थः॥अनुजिघृक्षत्वादितिभावः॥
संभाव्यनिषिद्धौद्वौप्रतिषेधाविन्युक्तो॥अंत्यलायमकं॥४२॥द्युवियदिति॥द्यांस्वर्गंवियदंतरिक्षंचगच्छतीति॥द्युवियद्गामिनी॥द्वितीयाप्रकरणेग

॥कांचीयमकं॥नेनन्याऽऽनेनिरे भीमा भीमार्जुनफलाननाः॥ननाऽनुकंप्य विशिखाः शिखिवाधरजवाससः॥४२॥

॥गूढचतुर्थपादः॥द्युवियद्गामिनी तारसंरावविहतश्रुतिः॥हैमीषुमाला शुशुभे विद्युतामिव संहतिः॥४३॥

म्यादीनामुपसंख्यानात्समासः॥तारसंरावेण उच्चउच्चनादेन विहिताविद्धाः श्रुतयोयासांनयोक्ताः॥हैमी॥हैममयीइषुमाला शिवशरा
वलिः॥विद्युतां॥संहतिरिव॥उक्तविशेषणात्विद्युन्मालेवशुशुभे॥चतुर्थपादवर्णानांत्रिपाद्यसंभवाद्गूढचतुर्थपादः॥४३॥जगतीनि॥
अर्थत्रयवाचीश्लोकोयं॥तत्रादौ॥अगराजश्रुतिपदमाश्रित्यैकोर्थोऽभिधीयतेईशस्यरणेप्रवृत्तः॥पाकृः॥अन्यत्रजगतीपारणे॥भूर्त्तु

रणेयुक्तोनियुक्तः॥हरिः सिंहइवकांतः॥अन्यत्रहरीणांसिंहानांकांतः॥आवासदानात्प्रियः॥सुष्ठुदधातीति प्रजाःपालयतिसुधाः॥क्विवंतः॥अन्यत्रसुधा
अमृतंनादत्तिनः॥उज्वलः॥दानवर्षी॥बहुप्रदः॥कृताशंसः॥जनजयाभिलाषः॥अन्यत्रदानवैर्दैत्यैः॥ऋषिभिः॥इन्द्राकामेनचकृता॥असंशासमानाभिमान
फलाभिलाषोयस्मिन्सः॥नागरोऽर्जुनः॥अगराजोहिमवानिवजगति॥जगत्सां॥प्रभाविनेकोर्थः॥अथऐरावणोपाम्यमुच्यते॥जगती भुवंधरंतिन
तुंकुर्वंति इतिजगतीधाः॥राक्षसाः॥तेषांरणः॥तत्रयुक्तः॥विहितहरिकांतः॥प्रियः॥उभयत्रापिसमानमेतत्॥सुधासिनः॥अमृतवत्स्वच्छः॥एकत्र
॥अर्थत्रयवाची॥जगतीशरणेयुक्तोहरिकांतःसुधासितः॥दानवर्षीकृताशंसोनागराजइवावुभौ॥५५॥
श्रीतलः॥दानवर्षी॥अतएवकृताशंसः॥नागराजइव॥ऐरावणइवावभाविनिर्दिष्टयोर्थः॥अथशेषोपम्यमुच्यते॥जगतीधा
रणे॥भूरक्षणे॥युक्तोनियुक्तः॥देवेनेतिशेषः॥धारणंरक्षणंग्रह इतिविश्वः॥हरिकांतः॥कृष्णप्रियः॥उभयत्रापितुल्यमेतत्॥सुधावसुधेति
केचित्॥तत्रासितोवद्धः॥अन्यत्रसुधयाअमृतेनसितोवद्धः॥अमृतप्रियस्पर्धः॥दानवाअक्षयप्रदंईलक्ष्मीअनाभिकृताशंसो॥विहितप्रसंसः

उभयत्रापितुल्यमेतत्॥विहितः॥नागराजइव
ऐरावणइव भाविनिर्दिष्टयोर्थः॥५५॥

विलंघ्येति ॥ शिवाशिलीमुखैः ॥ पत्रिणां पङ्क्तीः ॥ निजशरावलीः ॥ विलंघ्य ॥ अतिक्रम्य ॥ भिन्नो विघ्नो कपिध्वजः ज्यायः ॥ प्रशस्तं ॥ महद्वा प्रशस्तयोर्ज्या
मान्नित्यमरः ॥ वीर्यं सत्वमुपाश्रित्य आश्रित्य नवकंपेन चचाल ॥ किंतु सेहे ॥ अवतस्थावित्यर्थः ॥ ४५ ॥ विफलीति ॥ शंभुना हतवाणस्य ॥ अतएव वि
फलीकृतयत्नस्य ॥ गांडीवं धनुर्यस्य तस्य गांडीवधन्विनोऽर्जुनस्य ॥ वा संज्ञायामित्यनङादेशः ॥ खेभ्यः इंद्रियरंध्रेभ्यः ॥ खमिंद्रिये सुरवस्वर्ग

विलंघ्य पत्रिणां पङ्क्तीर्भिन्नः शिवाशिलीमुखैः । ज्यायो वीर्यं समाश्रित्य न चकंपे कपिध्वजः ॥ ४५ ॥ विफलीकृतय
त्नस्य क्षतवाणस्य शंभुना । गांडीवधनुषः खेभ्यो निश्चचार हुताशनः ॥ ४६ ॥ स पिशंगजटावलिः किरन्नुरु
तेजः परमेण मन्युना । ज्वलितौषधिजातवेदसा हिमशैलेन समं विदिद्युते ॥ ४७ ॥ इति विश्वः हुताशनोऽग्निः निःश्वासनिः
क्रांतक्रोधादिति भावः ॥ ४६ ॥ स इति ॥ पिशंगजटावलिः ॥ पिशंगजटाजूट ॥ परमेण ॥ उत्कटेन ॥ मन्युना ॥ क्रोधेन ॥ उरु महत् ॥ तेजः कि
रन् ॥ क्षिपन् ॥ सोऽर्जुनः ॥ ज्वलिता ॥ ओषधयः ॥ तृणज्योतींषि ॥ जातवेदा वाग्निश्च यस्मिंस्तेन हिमशैलेन समं तुल्यं ॥ हिमाद्रिवद्विदि
द्युते ॥ इति बिंबप्रतिबिंबभावेनोपमा ॥ ४७ ॥ ॥रामजी॥ ॥

शतश इति ॥ शिवः शतशो विशिखान् अवद्यते ॥ खंडयते रणे वेगेन शालिने रणसंरंभशोभिने ॥ अस्मै ॥ पार्थाय ॥ भृशम ॥ निवार्य्य ॥ वीर्य्यवत्तां निजा-
मिति शेषः ॥ प्रथयन् ॥ दर्शयन् ॥ किंतु अघातुकम् अमारकं ॥ लघयतेर्न्यादिना हंतेरुकञ् ॥ इषुजातावेकवचनं ॥ प्रजिघाय ॥ प्रयुंजे ॥ हिगताविति धातो-
र्लिट् ॥ हेरचङीति कुत्वं ॥ ४८ ॥ शंभोरिति ॥ सिताश्वोऽर्जुनः ॥ शंभोर्धनुर्मंडलतः ॥ धनुर्वलयतः ॥ प्रवृत्तं निःक्रांतं ॥ नरेषु ॥ अंशुभर्त्तुरर्कस्य

शतशो विशिखानवद्यते भृशमस्मै रणवेगशालिने ॥ प्रथयन्ननिवार्य्यवीर्य्यतां प्रजिघायेषुमघातुकं शिवः ॥ ४८ ॥
शंभोर्धनुर्मंडलतः प्रवृत्तं तं मंडलादंशुमिवांशुभर्तुः ॥ निवारयिष्यन्विदधे सिताश्वः शिलीमुखछायवृतां ध-
रित्रीम् ॥ ४९ ॥

मंडलात् प्रवृत्तं ॥ अंशुमिव ॥ अत्रापीषुवज्जातावेकवचनं ॥ निवारयिष्यन् ॥ निवारयितुंकाम इत्यर्थः ॥
क्रियार्थक्रियायां लृट् इति शतृ ॥ शिलीमुखानां छाया शिलीमुखछायं ॥ छाया बाहुल्ये इति नपुंसकत्वं ॥ तेन वृत्तां व्याप्तां धरित्रीं
विदधे कृतवानित्यर्थः ॥ ४९ ॥ ॥ रामजी ॥ ॥ रामजी ॥ ॥ रामजी ॥

घनमिति ॥ अयुगलोचनस्य ॥ विषमनेत्रस्य ॥ ईश्वरस्य वाणः ॥ जातावेकवचनं ॥ घनं सान्द्रं ॥ अर्जुनस्य वाणः ॥ शृंगंशरस्त्रानं ॥ विदार्य्य ॥ विभि
द्य ॥ ससार ॥ वव्राज ॥ तदानीमेव युगलोचनस्यार्जुनस्य ॥ वाणोविदार्य्य ॥ ननाविशेषेणघनं सान्द्रं ॥ अर्जुनाः ॥ ककुभद्रुमाः ॥ वाणा ॥ नीरसे
रेयकाः शृंगाः क्रमुकद्रुमाः तेषां द्वंद्वः ॥ विभाषावृक्षमृगतृणधान्येत्येकवद्भावः ॥ विदार्य्य विभिद्य ॥ ससार ॥ विवेशेत्यर्थः ॥ सगनो ॥ अयवाघ
नमिति ॥ अलोचनस्य चक्षुर्ज्ञान विषय रहितस्य ॥ अयुगलोचनस्य ॥ ईश्वरस्य ॥ ससारः ॥ वाणः ॥ मारस्येर्य्य ॥ वाणः शब्दः नाभ्यांसह वर्त्तते

घनंविदार्य्यार्जुनवाणशृंगंससारवाणोयुगलोचनस्य ॥ घनंविदार्य्यार्जुनवाणशृंगंससारवाणोयुगलोच
नस्य ॥ ५ ॥ रुजन्महेषून्बहुधाशुपातिनो मुहुः शरौघैरपवाहयन्दिशः ॥ चलाचलोनेकइवक्रियावशान्महर्षि
संघैर्बुबुधेधनंजयः ॥ ५ ॥

तथोक्तः ॥ ववयोरभेदेनेत्युक्तस्य ॥ ननयुज्यते ॥ कुत्रापीत्ययुक्तः ॥ असंगक्षिप्रवाणः ॥ जातावेकवचनं
घनं ॥ सान्द्रं ॥ अर्जुनस्य वाणः शृंगं ॥ मारस्त्रानं ॥ विदार्य्य ॥ विभिद्य ॥ विदार्य्य हस्तविशेषेण घनं ॥ सान्द्रं ॥ अर्जुनाः ककुभाद्रुमा ॥ वाणानीरसाः सैरेयकाः ॥
शृंगाः ॥ क्रमुकाः ॥ तेषां द्वंद्वैकवद्भावः ॥ अर्जुनवाणशृंगं ॥ ससार ॥ विवेशेत्यर्थः ॥ ५ ॥ रुजन्निति ॥ बहुधानिपातिनः ॥ आप ततो महेषून्मुहुः श

रोधैः सृजन् ॥ भंजयन् ॥ नयादिशापवादयन् ॥ आछादयन् ॥ क्रियावसाहृतिवशाज्ज्वलाचलः ॥ वंचूलोथधनंजयः ॥ महर्षिसंघैरनेकोबहुरिवबुबुधे ॥ ददृशे इत्यर्थः ॥
५१ ॥ विकाशमिति ॥ जगतीशस्यार्जुनस्य ॥ मार्गणाः ॥ विकाशमीयुः ॥ निर्गमनमार्गं ॥ नराज्जगतीलोके ॥ ईशमार्गणाः ॥ शंभुशराः ॥ विकाशं ॥ विषमगतिं भंगमीयु
रित्यर्थः ॥ नयाजगतीशमार्गणा जगतीभुवं ॥ शप्स्यंति ॥ ननुकुर्वंतीति ॥ जगतीशाः ॥ ऐन्द्राः ॥ आतोनुपसर्गेकः ॥ नान्मार्यंति निघ्नंतीति ॥ जगतीशमारः ॥ द्वि

विकाशमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः ॥ विकाशमीयुर्जगतीशमार्गणा विकाशमीयु
र्जगतीशमार्गणाः ॥ ५२ ॥ संपश्यतामितिशिवेनवितायमानं लक्ष्मीवतः क्षितिपतेस्तनयस्य वीर्यं ॥ अंगान्यभिन्नम
पित्तत्वविदां मुनीनां रोमांचमंचिततरं विभरांबभूवुः ॥ ५३ ॥

॥ एनेचतेगणाश्च ॥ जगतीशमार्गणाः ॥ किकायमुल्लासमी
युः हर्षंप्रापुरित्यर्थः ॥ अहोदेवेप्यस्यपराक्रमप्रसरइतिविस्मयादिति भावः ॥ नदंती ॥ मार्गंतीति ॥ मार्गणाः कर्त्तरिल्युट् ॥ जगतीशस्य मार्ग
णाः ॥ अन्वेषकाः ॥ जगतीशमार्गणाः ॥ शिवद्रष्टारो देवर्ष्यादयः ॥ नारदादयः ॥ वीनां ॥ पक्षीणां ॥ काशो गतिं ॥ पत्रोति विकाशं ॥ आकाशं ईयुः ॥
दित्सयेतिभावः ॥ ५२ ॥ संपश्यतामिति ॥ इतीत्थंशिवेन ॥ वितायमानं ॥ वितन्यमानं ॥ तनोतेर्यक्रीति वैकल्पिक आकारादेशः ॥ लक्ष्मीवतो ज

पश्रीमतः ॥ माडुपधाय इत्यादिनावकारः ॥ हितिपनेतनयस्य अर्जुनस्य ॥ वीर्यं ॥ शौर्यं ॥ संपश्यतां ॥ तृत्वविदामपि ॥ हरेरंशावना
रोयमिति विदुषामपि किमुनामितिभावः ॥ मुनीनामंगानि गात्राणि ॥ अभिन्नमविरलमाविनतामिति रुचिरं ॥ रोमांचं ॥ रोमह

इतिश्रीकिरातार्जुनीये महाकाव्ये भारविकृतौ लक्ष्म्यंके धुद्धवर्णनो नाम पंचदशः सर्गः ॥१५॥

र्षरंगं विभरां बभूवुः ॥ बभुः ॥ श्रीह्रीत्यादिना विकल्पादाम्प्रत्ययः ॥ ५३ ॥ इतिश्रीमहोपाध्यायमल्लिनाथसूरिविरचितायां किरातार्जुनीय
व्याख्यायां घंटापथसमाख्यायां पंचदशः सर्गः ॥१५॥ सं १९२८ ज्येष्ठवदी प्रतिपमायां समाप्तिमगात् ॥ • शुभं भवतु

[illegible]